१०२
२

अथ

102
2

ग्रन्थनामः	"शावरभाष्यवार्तिकम्"	
कर्तृनामः	कुमारिलभट्टः"	
विषयः	"पूर्वमीमांसा"	

Shabar Bhashya varttikam

819

१०२/२

102/2

अथ

शाबरभाष्यवार्तिकम्

कुमारिलभट्ट प्रणीतम्

श्रीमत्कुमारिलभट्टविरचितपूर्वमीमांसाशाबरभाष्य
वार्तिके द्वितीयाध्याय प्रथमपादारंभः

१८००

२/२०१

७५

श्रीगणेशायनमः॥ ॥ नावार्थाः कर्मशब्दाश्चेन्य[illegible]या प्रतीयते पदार्था विधीयते। संबंधं तावल्लक्षणादु
यस्पष्टं करोति। तत्र प्रथमेध्याये प्रमाणलक्षणं हेत्वत्रमित्यप्युक्तं।। कुतः।। नैव हि प्रथमेध्याये ह्येनकारेण किंचना
लक्षणेन प्रमाणादेः स्वरूपमुपवर्णितं। तन्नामलक्षणमुच्यते। येन तद्व्यतिरिक्तेन्यत्तत्स्वरूपव्यावृत्ता
कारेण निरूप्यते। न चैवं प्रमाणादिलक्षणमुक्तं। अनुमानादीनि तावच्चैवमुक्तानि। प्रत्यक्षमपि धर्मप्रत्य
१ निमित्तत्वेनोपन्यस्तं न लक्षणत्वेनेति व्याख्यातं। न च शब्दोपि धर्मप्रमाणत्वेन कश्चिल्लक्षितः। अस्मिन्नेवा
धिकरणे तस्य लक्षणमात्रं चोदनादिवृत्तिकारेण सर्वेषां लक्षणं प्रदर्शितं। न तद्व्याख्यायार्थत्वेनोपसंह
र्तुं युक्तं। सूत्रव्याख्यार्थानुपसंहारात्।। कथं च समस्तलक्षणार्थव्यतिरिक्त एवार्थे सूत्राणि रीयेरन्न पि
वा वृत्तिकारेणायोग्यं तत्त्वबद्धः प्रत्यक्षपूर्वकः। अपरीक्षिततया सापि नैव लक्षणगोचरः।। लोकप्रसिद्धा
निहितान्यपरीक्ष्यैतानि न प्रथमाध्यायविषयत्वेनोपसंहारमर्हति। तस्माद्यत्प्रथमेध्याये वृत्तं तद
लोच्येतद्वाच्यमन्येयं। तत्र प्रमाणलक्षणं तावच्चोदनालक्षणोर्थो धर्म इत्यादितद्वनिर्णीतिः प्रमाणे चै ॥१॥

वै२

वव स्थिता॥ सममन्त्रोक्तिः प्रथमः पादश्चोदनालक्षणसूत्रपरिकरस्तत्र च धर्मस्य चोदनालक्षणत्वमुक्तं अतोव
धारितार्थलक्षणग्राह्यसांदृसाहचर्यात्प्रमाणशब्दः प्रमीयत इत्येवं व्युत्पत्त्या धर्मविषय एव व्याख्येयः
सत्यपि च प्रमेयमात्रवाचित्वेऽस्मिन्नु काण्डे जिज्ञास्यत्वेन धर्मः प्रमेयः प्रकृतः तद्गुतिस एव गृह्यते अथवा क्र
णामेव प्रमाणानां तस्मिन्न लक्षणमुक्तं। यद्यपि च सर्वं प्रमाणानां तन्नोक्तं। तथापि धर्मे प्रमाणस्य चोदनाख्येनाम
लक्षणमित्येतावतैवोक्तं मन्यते। न चावश्यं सर्वात्मनैव लक्षिते तल्लक्षणत्वे विशेषरूपाणां मानत्वेन स
र्वलक्षणाभावप्रसंगादपि चौत्पत्तिकसूत्रेण विशेषोपक्षेप्त एव येनागमविशेषोऽवगम्यते। अथवा
पन्यसूत्रस्य चोदनात्मकस्य प्रमाणस्य लक्षणे प्रामाण्यकारणमुक्तमित्युपसंहारसूत्रव्याख्यायामपि विधेरिदं
रूपमिदमर्थं चादस्येदं मन्त्रस्येत्येवं नोक्तं। तथापि धर्मे प्रत्यक्षप्रयोगाभिधानात्सर्वं निर्णीतमवसराना
वान्तरस्वरूपं निर्दिष्टं श्रुतिमूलत्वं च विज्ञानस्य स्मृतिप्रामाण्यं तत्र च नामधेयस्य चोदनान्तर्गतं तत्राप्रमाण
त्वं। संदिग्धार्थनिर्णयो वाक्यशेषसामर्थ्ययोः प्रामाण्यमित्येवं समस्तमध्याये प्रमाणलक्षणमित्यावद्द

त्वात्तत्प्रसक्तेर्व्यामित्यविस्मृतप्रामाण्याहिंसेत्यादिप्रतिपादनमविशेषादनर्थकेहिंस्यादितिक्रियमाणं
स्मृतेः यथाह्यनर्थकेनामेत्यपिप्रत्यवतिष्ठेत ननुप्रधाना। प्रधानचिंता तृतीयचतुर्थयोर्विषयः। कथम
त्रोपन्यस्यते केचिदाहुरिह द्रव्यकर्म्मणोः कृत्तरत्वेन तु कर्म्मणामेव गुणप्रधानत्वविचारादपौनरुक्त्यमिति
तदयुक्तं। द्रव्यं गुणकर्म्मसंस्कारेषु त्यत्र सर्वेषामभिधानात्। तेनैवंवाच्यं तदुणार्थत्वेन भेदः शेष
२ त्वादिभिः। तमत्वपूर्व्वभेदो पिप्राधान्यं तत्प्रसिद्धये। ॥ कर्म्मभेदप्राबदो अग्निकोलदृणार्थस्तदपवा
दत्वेनानेरस्तदनुतिष्ठादिना च पूर्व्वभेदो भेदो। तत्र प्रतिकर्म्म भेदमपूर्व्वभेदप्रसक्तो तृतीयासिद्धः प्रधाना
विचारः पुनरपवादत्वेन स्थाप्यते। सत्यपृथक्त्वादीनां शब्दांतरादिभिर्निर्दिकर्म्माको तत्रदृष्टप्रयोजनत्वा द्वि४
र्थवसानानां क्रियाजन्यापूर्व्वांतरोत्पत्तिः। यत्तुनियमापूर्व्वं तत्क्रियाकृतं न भवतीति न तथा व्यपदिश्यते
तेनयत्रैवद्रव्यादीनि प्रतिक्रियाणां प्राधान्यं तत्रैव तद्भेदनिमित्तापूर्व्वभेदसिद्धिः। अस्यैव विवेकार्थं
गुणप्रधानलक्षणं वक्ष्यते। तदपवादापवादार्थं धर्म्मामात्रे तु श्रुतशास्त्रयोरितिबाधिकरणद्वयं प्रस्तोष्य २

तो।ततस्तद्व्याख्यातद्वैविध्ये वधारिते प्रसंगात्तृतीयं प्रकारमभिधाय कर्तव्यं प्रतिपादयितुं मंत्रप्रस्तावस्तल्लक्षणा
दीनि तु प्रसङ्गानुप्रसक्ते नयावत्पादसमाप्ति।ततः शब्दान्तराभ्यासौ भेदमुक्त्वा पौर्णमास्यधिकरणेनान्या
सापवादः करिष्यते।समुदायानुवादत्वान्नैतत्तत्तदपवादार्थमुपांशुयाजाख्यारायि हेतुत्रपञ्चसोमाधिकर
णानि ततः संख्यासंज्ञागुणैर्भेदमुक्त्वा वचगुणागतो विचारेप्याक्षप्रकरणान्तराधिकरणं ततस्तन्न्यायानुवृत्ति
रा आख्यातान्तराधिकरणं तत्र षड्भ्योतिरिक्तेन भेदकारणाभावादासः संज्ञाभ्याससगुणप्रक्रियाणां वाशी को निवृ
त्तिरित्येतावान्भेदलक्षणार्थः॥ एष एवार्थो विरूपेण क्तश्चः ... गांगि वाघव धारणार्थं। न वान्यस्येदानीमव
सरोस्तीत्ययमेवाध्यायसंबंधः कुतः। शेषशेष्यादयः सर्वे कर्मभेदनिबंधनाः। कार्येज्ञाते धिकारं स्यादु
पदेशातिदेशयोः॥ प्राकृत्वर प्रमाणलक्षणादेरर्थविचारात्मकत्वान्न कस्यापि भेदलक्षणादेः प्रस्ता
वदुत्तरकालमारंभः तत्रापि शेषशेषित्वे प्रयोजकाप्रयोजकत्वे क्रमस्थानिस्थानानां भवतीति न भेदल
क्षणमाश्रयन्ते।तथाधिकारः कर्मभेदरूपेवधारिते तत्तद्योग्यतया शेषो निरूपयितुमिति प्रेष्वापि लक्षणा

निप्रतीक्षते। तथोत्तरपक्षोऽतिदेशविषयत्वादुपदेशज्ञानाधीनसिद्धिः समस्तः समस्तं पूर्वपक्षमपेक्षते।
अतश्च परिशेषसिद्ध्यायं भेदलक्षणाख्यसंबंध इत्युपलारभ्यते। षाड्विध्यं कर्मभेद इति। साधननिर्देशप्रकारा
नु। वक्ष्यमाणसूत्रक्रमानुरोधेन नामधेयसंख्या नेतरैः पृथक् पठितत्वे सदृतादरादंते पठितामिति करणत्वेवर्थः।
षड्विधः कर्मभेद एतैः करणैरिति यावदथवा कारणैर्भेदशब्दस्य त्वाच्य सामानाधिकरण्येनैव शब्दान्तरा
३ दीनि व्याख्येयानि। संज्ञाशब्दौ तयोः संख्यागुणयोश्चापौनरुक्त्यस्वरूपेणैव व्याख्यामः। सर्वदावेषां भिन्नविष
यत्वान्न श्रुत्यादिवद्बलाबलचिन्ता भविष्यतीति तद्भेदप्रतिपादनमात्रं तात्पर्यगान्यदुपोद्धातादिना। तत्र
विध्यंशप्रकृतसिध्यर्थमुपोद्धातं प्रवक्ष्यते। प्रसक्तानुप्रसक्तादिप्रस्तुतादुपजायते। यथेदमेवाधिकरणं प्रकृ
तानुनिष्पाद्यापूर्वभेदानुसारसिध्यर्थमुपोद्धातत्वेन भविष्यति। कतरस्मात्पदात्फलेन संबंध्यमानादपूर्व
भेदाभेदावनुगंतव्याविति यदा निरवयवौ वाक्यवाक्यार्थौ स्यातां ततः किं प्रतिप्रदेशं कर्म इत्यादिः संबंधप
नविचारः स्यादत आह॥ वाक्येव पदानामर्थाः इति चापि वोच्यते॥ चोदनालक्षणत्वेन वाक्यार्थवास्थिते। ३

यत्राधर्म्मः प्रतिपदं वाच्यः कथमाशंक्यते तत्र।। यदि दृष्टधर्म्मस्वरूपमभिधीयेत ततः किंपदेन पदेनोच्यत
इति विचारो युज्यते। नादृष्टाणिकल्वे च युक्तः। तदुच्यते। धर्म्मश्चेत्फलसंबंधात्पदार्थस्यैव युज्यते। तत्किमेक
स्य सर्व्वेषामिति युक्तो विचारः। नैवाश्रयो धर्म्मः स किंपदेन पदेनोच्यत इत्येवं विचार्यते किंतर्हि यः पदेन
पदेनोच्यते स किं फलसंबंधोत्तरकालं वा स्वार्थात्मना गम्यमानो धर्म्मो भवत्यथेतरपदार्थानुगृहीत एक
पदार्थ इति तदेवं सर्वैरेकस्य धर्म्मत्वे प्रतिपादिते भवति साद्रष्टात्फलसाधनमात्रस्य धर्म्मत्वाभ्युपगमात्
न तु सर्वेषामेकः कश्चिदर्थोस्ति यः सर्वैरेक इत्येवमाश्रीयेत। यच्च फलपदेन सह पदं संबध्यते तस्यार्थे
धर्म्मम पूर्व्वसाधनं च भव्यते। तेन किं सर्व्वाणि पदानि फलपदेन संबध्यंते किं वैकमिति विचारः। किं प्राप्नोति
पदमिति। कुतः। एकरूप्येण संबंधः प्रधानेन न वा सिध्यति। तस्मात्फलपदेनैव सर्व्वसंबंध्यते पदो यदि दृ
विशेषो वगम्येत इदं फलसंबंधयोग्यमिदं नेति ततः किं विदेव संबध्येत। न च गम्यमाने तु सर्व्वाणि पदा
नि फलपदेनैव संबध्येरन् यदि चैकं फलसंबंधीत राणि च तत्संबंधीनीति कल्प्यते। ततो वाऽनपेयाधि

भाम्वा

करणन्यायेनैकस्य फलं प्रत्युपादानविधानगुणभावादितरत्र प्रत्युद्देश्यानुवादप्राधान्याद्वैरूप्यापत्तिरिति वा
च्यनेदं प्रसंगः॥ सर्वेषां तु फलं प्रत्युपादीयमानानामैकरूप्यात्तेन सह संबंधोपपत्तिः॥ सर्वे सति संबंधे गुणत्व
तिलेश्च प्रधानेनैव नित्यं संबध्यते। तस्मात्सर्वेषां फलसंबंधाद्धर्मी चैत। तन्नु किं सर्वत्र प्रत्येकं संबंधं फ
लेसाधयेत्तथ दर्शपूर्णमासवत्सरस्य तथा किं विकल्पेन समुच्चयेनेत्यादि यथेष्टं कल्पनीयं। तत्र फल
४ भूमगरीयस्त्वात् एकत्रोत्पादनाभावाद्धर्मसत्त्वं प्रत्येकं साधनत्वं न्याय्यं गमात् सर्वेभ्यः एव फलमि
ति पूर्वः पक्षो दध्यवारुणादिन्यायेनैकवाक्योपादानात्सहितानां फलं प्रत्येकेन निराकांक्षत्वान्नत
दानीमितरसंबंधोपपत्तिस्तस्माद्विकल्प इत्यन्यत्राभिधीयते॥ फलेन यस्यासंबंधस्ततो पूर्वं प्रकल्प्यते। त
दल्पाल्पोपपत्तौ न युक्ता बहुकल्पना॥ यदि हि फलसंबंधमात्रपर्यवसायि वचः कोत्र चेतेत्ततः कदाचित्स
र्वेषामपि फलेन संबंधेऽन्यत्र हेतुता वन्ध्यात्रेति। सिद्धेरपूर्वमन्यत् कल्पयितव्यं। तच्चान्यथानुपपत्तिप्र
माणकं। तत्रैकापूर्वकल्पनयोपपन्ने वाक्ये नादृष्टान्तरकल्पना प्रमाणाभावात्। यो हि बहुत्व पूर्वाणिक ४

ल्पयति कल्पयत्यसावेकं। तद्धेकल्पितमर्थेव वाद्यामस्य द्वौणाः न्यथानुपपत्तिर्न्नापृष्ठोतरस्य प्रमाणं न
वति। तस्मादेकमेव फलसंबंधितस्माद्यापूर्वमितरत्फलवद्गुपकारीत्यध्यवसीयते। नवात्रविरोधो न
विष्यतितिनामधेयत्वेन परिहारादगत्या वादेशापवित्रेणाथ हंसमस्मार्ष्टीति विन्मयत्वेल द्वाणाश्रयणानु।
स्यर्थादित्त्वसाध्यांशद्वारेणाव्याथी वर्थैरात्मीयकरणग्रहणासिद्धेः। एवं च स्थितेकतरदेकं संबंध्यतामितिसर्व
थानेकाद्दष्टकल्पनापरिहारादनियमप्रापानुच्यते। प्रधानेफलसंबंधितसंबंधं गमिष्यते। प्रधानांगत्व
मेकस्यनवैकत्रावकल्पते। नह्येकस्मिन्वाक्ये तदेवकदाचित्फलसंबंधात्प्रधानं कदाचिच्च फलवद्गुपका
राद्दंगंयुज्यते नियतरूपत्वादंगांगिभावस्य तस्मात्रियोगेनैवाख्यातान्नामपदाद्वा। पूर्वपक्षे प्रतीतिः। कथं पु
नर्भावः केवलभावशब्दाइतियावेतः फलसंबंधिषुवाक्येष्वाख्यातशब्दाः यजतिददातिजुहोतीत्यादयः।
तेषु प्रत्ययार्थप्राधान्या कर्त्तरि च लकारोत्पत्तेः यागादिविशिष्टकर्त्रभिधानेकथं विद्याविपर्ययात्कर्तृविशि
ष्टयागाद्यभिधानं मत्वा नस्य प्रश्नः। सत्यामपि वैकपर्यनुयोगे नो नयपर्यनुयोगासिद्धेर्येयंयजतेन मित्याय

गादित्यनुदात्तत्वेव भावार्थेतां ब्रवीति नूनं केयं लौकिको भावशब्दस्यापीत्युभयप्रश्नः॥ सिद्धांतवादी तु भवते
र्णिजंतादरसितप्रत्यये कृते भावना भावितेन भावशब्देन कृत्याद्याख्यातस्यान्वयव्यतिरेकाभ्यां तत्त्व
रूपं कर्त्रभिधानप्रतिषेधमभिप्रेत्यादास्यातिङितिदातीति परः॥ पुनर्भवते र्णिजंताद्ध्येतनेर्व्यभिधीय
ते। नवाख्यातप्रत्ययस्यात्र व्यापारो वा वैतरार्थेत्वाकामं तुल्यजातीयत्वेन धातव एव वृपुत्स्वेपि तु यागा
५ दिवचनत्वात् स्वसमर्थाइति भवार्थत्वेन तु यागदानहोमशब्दा इत्यभिधीयते। यागदानाद्यनुसृतो भावना
त्मा व गम्यते स सर्वत्रैव शब्दार्थः सर्वत्र वाख्यातेर्थेवत्त्वर्थश्च तदनुरक्ता वना भावना विज्ञायते। तस्माद्भावार्थ
त्वव्यपदेशः स्वव्यतिरिक्तास्तु द्रव्यगुणशब्दाविज्ञायंत एवेति न प्रष्टाः॥ ॥तत्र द्रव्यादिशब्दानां त्रिष्वन्ना
र्थानि धायिनो॥ करणार्थत्वयोग्यत्वात्प्राप्नोति फलसंगतिः॥ ॥सर्वत्र हि फले साध्यरूपत्वासिद्धरूपे सा
नमपेक्ष्य तेन साध्येत रं नामार्थ[illegible]सिद्धत्वादपेक्षापूरणसमर्थः॥ नाख्यातार्थः॥ स्वयमेव तावत्साध्य
त्वात्। तस्माद्द्रव्यादिन्यः फलमिति प्राप्नेमूर्ते गोत्तरं दीयते। भावार्थाः कर्मशब्दा येते भ्यो ष्ट्वेक्रियागतिः ५

५ नित्यमाख्यातशब्देभ्यस्तस्माद्भावार्थ इते श्रुतौ यावानेक्वा न न्यलभ्योर्थस्तच्छब्दाद्गम्यते ५

तिः कुर्याद्यजिना स्वर्गमिष्टार्थो विधीयते ।। फलसंबंधो हेतुरपूर्वं प्रतिपद्यते ।। संबंधश्चाकीदृक्पूर्वकः ।। साव
भावशब्देभ्यः प्रसर्प्यतीत्युच्यते ।। न द्रव्यगुणशब्देभ्यः तस्मादाख्यातेभ्यो पूर्वं भावना गम्यते तत्र यथा चार्थ
स्य करणत्वप्रतिपत्तिः प्रत्यासत्तेरतस्तेनैव फलकरणभूतेनान्यथानुपपत्त्या अपूर्वं भाव्यत इत्यवधार्यते
कथं पुनर्यजेत्यादीन्यर्थकृत्य केवलप्रत्ययवाच्य एव भावनार्थो लक्ष्यते भावयेदिति ।। कुतः ।। अभिदध्यः
ध्वज्ञास्त्राहि विधिमात्रं लिङादयः ।। एपरूस्य मवेतरर्थः केनांशेनाभिधीयते । नवघाचेतरार्थं यजादयः प्र
तिपादयंति स्वार्थमात्रयापृतत्वाद्धतः आकूरहितमेवेदमारोप्यते भावयेदिति । किं वा शब्दांतरस्य यागार्थ
र्थः पर्यायैरभिधीयते । न सतेनैव सहितः तस्मिन्नर्थे प्रयुज्यते । तद्यथापि कमानयेत्युक्तेऽयो नाम पि कार्यं
न प्रतिपद्यते तस्मै कोकिलशब्दमेव केवलं प्रयुंजते । न कोकिलः पिक इति तथात्र यद्याख्यातस्य करोतिरर्थ
ता भवतिः पर्यायस्तत्स्तदर्थकथनेतन्मात्रमेव प्रयोक्तव्यं नाख्यातप्रत्ययोऽपि । न हि तदानीं विवक्ष्यज्ञा
यते केनांशेन क्रिया प्रत्याय्यत इति अत्र उभावयेत्कुर्यादिति वा पुनरपि लिङ्ग्रपुष्पतएव । अतश्चायोन

न्यञ्जतेः परेणार्थः प्रतिपादितः सम्भावयतेरपि परेण तेनैवेत्यधिकावापएवभावयति तस्माद्वैदिक
इत्यत्राभिधीयते। सर्वत्रैवतावत् सिद्धकर्तृ क्रियावाचिन्याख्यातप्रत्ययेसति। सामानाधिकरण्येनकर्तृत्व
र्थोविगम्यते। इहकेचित्सिद्धात्तुध्यः परात् तिङ्विभक्तिरुच्चार्यमाणा कर्त्रात्मलाभमात्रमेवव्यापारं प्रतिपाद
यति यथास्ति भवति विद्यते इत्यादिः परेभ्यस्तु सिद्धकर्तृर्यत्यात्मलाभनिष्पन्नस्यव्यापारं प्रतीतिर्यथा पचति दद
६ ति पचति पठति गच्छतीति द्रव्यमेवविशिष्टैश्च तदुपते प्रवलितात्मतत्त्वं विप्रकीर्णस्वभावं पूर्वापरीभूतं प्र
थमावस्थातः प्रवृत्तपरामवस्थामप्राप्तंव्यापारं शब्दवाच्यं भवति। तत्र कदाचित्कर्त्रैवैवमवस्थः प्रती
सिद्धे यते कदाचिद्विशिष्टकर्तृर्यत्रान्यस्तद्यदा स्वकर्तुरेवैवभावस्था भवति तदासौ स्वयमेवाच्य स्मादात्मलाभमपेक्ष्य
ध्य मानः परनिष्पन्नावस्थापि प्रयमाणावाच्यः करोतिशब्दवाच्यतां भजति यदा तु स्वात्मकोन्यत्रव्याप्रियते
तदा करोतीत्येव मुपदिश्यते। तथाच किं करोति पचति गच्छतीति सामान्यविशेषरूपेण सामानाधिक
रण्यप्रयोगोदृश्यते ननु किं करोतिभवत्यस्तिवेति प्रयोगः स्युः। तस्मात्स्वात्मककर्तृव्यापारवचनात्कि ६

रोत्यर्थेप्याख्यातानितत्रैवक्रियमाणेनकेनचिदवश्यंभवितव्यं।कुतः।करोतिःक्रियमाणेननकश्चि
त्कर्म्मणाविना।भवत्यर्थेस्यकर्त्ताऽकरोतेःकर्म्मजायते।करोतेर्न्नित्यसकर्म्मकत्वा।धात्वर्थक्रियमाणेन
लन्यतेनतावदर्थः।पर्य्यवस्यतिसर्व्वकारकाणांवावांतरक्रियासुकर्तृत्वेप्रतिपद्यमानानांप्रधानक्रिया
सुकर्म्मादिविभागोजायतेप्रतिक्रियंव्याप्यताभेदादवांतरक्रियावैचित्र्यंभवतितत्राव्ययव्यतिरेका
भ्यामिदमवगतंभवतिक्रियायाःकर्त्ताकरोतेःकर्म्मसंपद्यतइति॥ ॥तथाहि॥ ॥नित्यंनत्रैवनेयमर्थ्य
स्यवानित्यनृतता।नतयोःक्रियमाणत्वंखपुष्पाकाशयोरिव।यएवंरूपस्तत्रभवनःसंभावितभवनो
वान्येनप्रकल्पतेसएवक्रियमाणत्वेनावधार्यतेनान्यस्तथाचनकश्चित्खपुष्पमाकाशंवाकुर्वन्नुप
लभ्यते।यत्रापिपिपादौकुड्यत्यादिषुनिष्पन्नानांकर्म्मत्वयोगोदृश्यते।तत्राप्यनिष्पन्नसंस्कारादिविवक्षा
यापादादिशब्दप्रयोगादव्यभिचारःसत्यपिचकरोतेरनेकार्थत्वेसर्व्वत्रागेयमनावद्देपाणादौकिंचिदनु
त्पन्नोत्पादनसामान्यमवगम्यते।अथवायपदार्थस्योत्पादनाभिधायित्वेतदेवविशिष्टाख्यातसामना

श्री·वा

विकरणं चेद्दृष्टमिति तद्वत्तस्योत्पाद्यमेव कर्म भवतीत्युपपन्नं।तेन भवति क्रिया तावज्ज्ञेया।ततस्त्वाकरो
त्यर्थस्याश्रयः कर्त्ता न चितुः सप्रयोजकः।।भवितारमपेक्ष्याथ प्रयोज्यत्वे प्रयुज्यते भवतिकरोत्योः शक्तिभेदाद्वित्ति
द्विपवत्योस्थिनियतं प्रयोज्यप्रयोजकव्यापारत्वं न चैतत्तत्व कदाचित् निर्मीयमानकर्मशक्त्यादिष्व
प्रयोज्यव्यापारः स्वयमादिष्व प्रयोज्यव्यापारत्वात् केवलं प्रयोजकव्यापार एव विवक्ष्यते।यथा करं करो
७ ति ओदनं पचति कदाचित् प्रयोजकव्यापारे प्रयोज्यव्यापारमारोप्य यथा भवति विक्लिद्यतीति तंडुला
इति।कदाचित् भोभिन्नो समुच्चित्य प्रयोगः करोति कटं देवदत्तः स च भवतीति कदाचित् उपसर्जनीभूतप्रयो
जकव्यापारः प्रयोज्यव्यापारः क्रियते यथा देवदत्तेनेति स्वयमेवेति वा प्रयोगे कदाचित् पुनः समानपदेक
देशोपात्तोपसर्जनीभूतप्रयोज्यक्रियः प्रयोजकव्यापारो विवक्ष्यते।तदा च करोति पचत्यादात्मने।
शास्त्रेऽप्रयोगात्र भूविक्लिद्योश्च केवलप्रयोज्यक्रियाभिधायित्वान्न साक्षात्प्रवर्तितुं शक्तिरस्तीति वा वक्तव्ये
न द्योतकत्वेन वा णिजपरः प्रयुज्यते भावयति विक्लेदयतीति वा।तथा चाह।प्रयोजककर्तृके कोऽन्तर्व्यापार ७

प्रतिपादकाः। एते ता एव प्रकृष्टं तेन प्रयोजककर्मसु। न च तेषामप्यन्यानामत्राशक्तिरित्यन्येषामस्वक्षयान
वितव्यमन्येषां वा शक्तिरित्येषामपि तदुद्भावितव्यं। कुतः। शक्तयः सर्वभावानां नानुयोज्याः स्वभावत एते
नना भावदंत्यर्थात् प्रकृतिप्रत्ययादयः। एवं करोत्यर्थद्वारेण सर्वाख्यातेषु भावयत्यर्थः सिद्धः तेन नृतिषु
कर्तृत्वे प्रतिपन्नस्य वस्तुनः। प्रयोजकक्रियामाहुर्भावनां भावनाविदः। यदुक्तं। न विधिव्यतिरिक्तं लिङा
दयोऽर्थं वदन्तीति। तदयुक्तं। कुतः। अविशिष्टां भावनामाहुरन्यामेव लिङादयः। अर्थात्मभावनां त्वन्यां स
र्वाख्यातेषु गम्यते। यदा हि सर्वाख्यातवर्तिनी करोति धात्वर्थवाच्या पुरुषव्यापाररूपा भावनावगताऽस्व
ति तदा तद्विशेषाः सामान्याख्यातव्यतिरिक्तशब्दविशेषवाच्याः विधिप्रतिषेधभूतभविष्यद्वर्त्तमानादयः
प्रतीयन्ते तथा च सर्वत्र सामान्यतः करोत्यर्थोऽवगम्यते। किं करोति पचति। किमकार्षीदपाक्षीत्। किं करिष्य
ति पक्ष्यति। किं कुर्यात्। पचेत्। किं न कुर्यात् न पचेदिति। तत्रार्थात्मिकायां भावनायां लिङादिशब्दानीयः
पुरुषं प्रति प्रयोजकव्यापारः सा द्वितीया शब्दधर्माभिधात्मिका भावना विधिरित्युच्यते। विशेषतश्च

यमर्थं वादयिकरणो वर्णितः। यत्तु पर्यायाच्छित्यति तिलंघनेन प्रत्ययापरित्यागादन्निहितं। तत्रोच्यते। केवल
स्याप्रयोगित्वात्कर्तृसंख्यादिसंग्रहार्थशब्दपा विना शास्त्रसिद्धिश्च प्रत्ययोऽपि प्रयुज्यते। यदि तर्हि केवलः क
रोतिर्भावयति द्वयोरप्रयोगार्हः स्यात्। ततः को किल शब्दप्रयोगे पिकशब्दवत्प्रत्ययो न प्रयुज्यते। ननु
केवलाद्धातोः प्रकृतेः प्रयोगोऽपशब्दप्रसंगात्। तेन यस्मिन्कस्मिन्प्रत्यये प्रयोक्तव्ये यस्यैवार्थः कथ्यते
 स एवानुवादयतः प्रकृत्यनुग्रहार्थं प्रयुज्यते। नान्यो न्यधिकार्थो व्यापादिप्रसंगात्। ननु वदकुत्रि
पो धातुनिर्देशे विहितौ अतस्तत्र कृतौ करोति भावयती प्रयुज्येयातां। नैतदस्ति। तथा सति हि शब्दपदा
र्थकत्वान्नैव तौ व्यामाख्यातार्थः कथ्यते। यत्तूक्तं विदर्थधातुभिः कृत्रिवरे प्रयुज्यते। यज्ञिर्यज्ञतिरिति।
तत्र केचिदिते लक्षणायार्थप्रतीतिरित्यवगन्तव्यम्। न चेह किंचिल्लक्षणाश्रयणे प्रयोजनमस्ति। येना
वाक्यः प्रयुज्येत तत्रान्य देवानिष्टमापद्येत तद्रूपं तद्धावधावति रूपमिधीयेते इति। तस्मादर्थपरत्वसि
द्धार्थमाख्यातप्रत्ययसहितावेव प्रयुज्येते यदि च भावनैवैकः प्रत्ययार्थः स्यात्करोतिर्भावयतीव समस्त

प्रत्ययार्थेणापादानसामर्थ्यान्नवेतात्ततः केवलप्रयोगेप्याप्रसंक्तेतन्नतु नयमप्यस्तीति करोति भावयति
भ्यां कथितेपि भावनार्थकर्तृसंख्यादिप्रत्यायनार्थं पुनः प्रत्ययउच्चार्यते। यस्तु तत्र भावना। भिधानो शः
सप्राप्तवादन्वेष्यते। अन्यथा हि भावनैव का प्रत्यायार्थः करोति भावयतीवा कर्तृसंख्यादीनामप्यभिधा
यका विति भ्रान्तिःस्यात्। नित्यैव पूर्वापरीभूता भावनाख्यातेतोप्यते। तत्र यदि प्रत्ययान्तरं प्रयुज्यते। ततः
करोति भावयति भ्योऽद्रव्यवदुपसर्जनरूपाभ्यमानानैवाख्यातसदृशी कथ्येत। तस्माद्वक्ष्यति तिङ्पिप्र
योक्तव्या इति। किंवा भावना गम्यमाना वधातुप्रत्ययसंनिधौ। कस्य वाच्येति विमृष्टे न कदाचित्प्रतीय
ते। यदि त्वेकात्तेनाप्याः प्रत्ययार्थत्वमवधार्यते। ततः करोति भावयति भ्यां प्रत्ययपौनरुक्त्याशंका स्या
न्नतु तदस्यानयसंनिधौ गम्यमानत्वाद्विवक्षितकेवलप्रकृतिप्रत्ययप्रयोगा नाबाद्धिन विवेको विज्ञायते। शक्य
ते हि वक्तुं धातुसहितेन भावनमात्प्रत्ययेनोच्यत इति। अथवा प्रत्ययानुगृहीतेन धातुना। अथवोभाभ्यां।
न वशक्तिकल्पनायां विशेषः। स्वार्थाधीपत्तिसाभ्यान्न च विवेकज्ञानप्रयोजनमस्ति। स्यादेतन्नरूदेता

ड्डातोरप्रतीतेस्तिङ्व्याप्तिवीमितपेव भावनेति। तदुक्तं। अस्ति विधति स्वातिपरेषु प्रत्ययेष्वप्यदर्शनात्।
नन्वकृते ष्वप्यत्वं तन्नावनाना स्ति। किं विदपकृष्यमाणरूपप्रतीतेः। स्तेष्वेतावद्दृन्तेत्वं येयपश्चयामिति
किं विद्धनाख्याताद्गम्यते। तत्रापि कर्मोत्पन्नेषु द्रव्यप्राधान्यात्तत्र स्त्रणोनरं नव्य इति भावोत्पन्ना
न्मूनतरा। नाह्ति तत्र प्रयोजकव्यापारप्राधान्यमेकत्र धात्वर्थप्राधान्यादितरत्रस्वव्यापारविविशि
ए ष्टप्रयोज्यपरत्वात्। एतेन भावकर्मोत्पन्नलकारा। स्तिङापिव्याख्याता। तेष्वपि हि प्रयोजकव्यापार
गुणत्वप्रतीतिरविशिष्टाश्रुतेन तिङ्तानां तुल्यकल्पत्वं तथाप्रत्ययकृतो भावेन्नवेती तिस्मरणावि
त्रोपि धात्वसंवेद्य ईषन्यून भावना ज्ञानं। अग्निकाम्भेनुहोतिदर्शतरुणाकेनोपवातं जुहोतीतिदन्नतरु
णाकेनोपवातं जुहोति। अनिषुत्पऊ वा भद्दयंतिपुराभाव: प्रवदितोरितिसर्ववत्रष्युस्यैव भावनोतर
सापेक्षा भावना गम्यते पक्षः। पक्षेवा नित्यपिनिष्टे स्वरूपभावनोपसर्जनद्रव्यप्रतीतिः। प्रत्यक्षे वा ए
वंपावकादिष्वपि द्रष्टव्यं। तथा च सर्वत्र कारकापेक्षा दृश्यते। अन्यथा स्तिरूपेति ह्रितसमासेषु विवेयं ८

नस्यात्। नचनिर्व्यापाराणामेतेषुव्यपदेशास्संभवंति। नचास्तिसव्यापारोयत्रकिंचिदसन्नजन्यते। ततश्चासि
द्धःकरोतिभावयत्योरर्थः। यःसर्वधातूनामविशेषः। शक्यतेचसर्वत्रकरोतिसामानाधिकरण्यमपिनि
र्द्देष्टुंविनापिपूर्वापरीभूतत्वेन। तद्यथा। किंकर्त्तव्यंपक्तव्यं। कथंकारंजुहोति। स्वमितिकामो। किंकरोतिजु
होति। अभिष्टुत्यकिंकृतवान्। पक्ववान्। किंकृतंपक्वं। किंक्रियोदेवदत्तः। पक्ता। केयंक्रिया। याकइति। न
चकरोतिसामानाधिकरण्यातिरिक्तमाख्यातेष्वपिभावनाप्रमाणंविद्यते। तस्माद्धातवोपिभावनांनमुंचं
ति। तथाचाहुः। करोतिरर्थेष्विवसर्वधातून्निति। यच्चस्याःप्राधान्यंतत्कामंतिङामभिधेयंद्योत्यंवा। अन्वय
व्यतिरेकाभ्यामस्तु। नस्वरूपं। नचैवमपियागेनेतिवल्लर्थनिष्कृष्टेनैवभावनापक्षपातेनेतिनाव्येदिति
पुनःप्रयोगेनप्राप्नोति। नैषदोषः। तथाहि। द्व्यर्थस्यधातोःभेदेनार्थेकथ्यमानेयागेनेतिविशेषरूपंक
रणात्मनानिष्कृष्टंइतरत्तुभावनात्मकंसामान्यरूपंशब्दान्तरेणभावयेदित्यनेनकथ्यते। अथवाकेचि
त्तुकरणांशःकर्तृसंख्यादयःप्रकृतिप्रत्यययोर्भेदेनवाच्याः॥ भावनातुसमुदयाच्छमिवारास्समुदितयो

रेवार्थइतिशंकनीयं वक्तुं। तथा च सूत्रकारभाष्यकाराभ्यां भावर्थ्याः कर्मशब्दा इति सामानाधिकरण्यमेवाश्रि
तं। न तु भावार्थत्वेन प्रत्ययाः कथिताः। शास्त्रेऽनुसर्व्वप्रत्ययार्थो भावनेति व्यवहारः तत्रायमभिप्रायः। प्रत्य
यार्थसहभूतः प्रकृतिप्रत्यययोर्मुदा प्राधान्याद्भावना तेन प्रत्ययार्थीवधार्यते। यद्यप्यन्यद्विवेककारणं
१० नास्ति तथापि प्राधान्ये प्रत्ययार्थधर्म्मे दृष्टं न्यूनमियं प्रत्ययार्थ इत्यवगम्यते। तथा च भवतोऽनित्यं प्रकृ
तिप्रत्ययांशयोः। प्रत्ययश्रुतिवेलायां भावनात्मावगम्यते। न केवलमेतावदेवान्वयव्यतिरेकौ योपर
स्परपरित्यागेन लक्ष्येते। तस्मिन्नेव हि पादतदाभासे इति तद्दृश्यत इत्यनेन न्यायेन विवेकोऽवधार्यते। य
त्वस्मादिपरः प्रत्ययोऽपि भावनां जहातीति तुल्ये धातुसमुदायपङ्क्तयोरपेतस्वेथा यत्र प्रतीयते तत्र ता
वत्प्रत्ययार्थत्वं निश्चीयते अन्यत्र च यं विचार एव नास्ति। कुविद्धाभिचारस्योत्तरमुक्तं तद्भूताभि
करणे स्वथवा नैवात्रापि व्यभिचारः। कुतः। अस्त्यादावपि कर्त्रंशे भावोऽस्त्येव हि भावनं अन्यत्राक्षेपमा
त्रातु न तथास्याः प्रकाशते यद्यपि कर्तुरनिष्पन्नत्वाद्यतिरिक्तं भावयितव्याभावादस्त्यादिषु प्रयोजक १०

व्यापारो नातीवलक्ष्यते तथापि प्रत्ययसामर्थ्यात्त भावयतीत्यवगम्यते। किमित्यपेक्षिते त्वा निष्पन्नेकर्त्त
र्यन्यात्किंचिदित्यकल्पनादात्मानमित्येवं संबध्यते। केन भवनेना। कथमवयवज्ञाननादिप्रकारेणेति त्रयोपित
त्रेनावनांशा। भवनांशान्भवनेनैव पूर्यंतो व्यापारांतरासंभवात्। तत्र केचिदवयवाः भवनव्यापृताः प्रयु
ज्यंते। केचित्सिद्धभवनाः प्रयोजकाः सिद्धभवनासिद्धभवनवर्त्तिवमा मान्यमुन्नयसंपर्कभेदभवनेनोच्यते।
एतेन जायते निष्पाद्यते सिध्यतीत्यादीनि व्याख्यातानि। अस्तिपुनडोनिसमानार्थो भवतेरुपरितनीमव
स्थामभिलपन्सत्तयात्मभवनं भवद्भावयतीत्येवमाख्यातप्रत्ययं लभते। तत्रापि तु कालेकृतभेदपूर्वोत्त
रसामान्यसत्तारूपेणापृथग्भवदेव प्रयोगान्तप्रयोगे। तत्कव्यापारकल्पनानुसत्तेर्ध्यामत्यामपि चैवमादिषु भाव
नायां निष्पन्नत्वेतनकर्त्तृविषयत्वाद्विधिप्रतिषेधयोरसंभवः स्यादेतत्। दृष्टो विधिरपि तस्मात्साध्यमानीय
स्याङ्कस्य विजानन्वितव्यो। रथंतरं भवत्यध्वर्युः स्यादिहोत्कृष्टो। निस्फरितिः। सत्यं हस्यते। नाविदृष्टेण
तुल्यो भवत्यर्थः। सिद्धो हि पुरुषः कर्मसंबंधनिमित्तमृत्विक्त्वं भवदन्यैरेव वाक्कायमनोव्यापारैर्नैव

पेतइत्युच्यते तथा रथंतरादिषु सत्यपि श्रुत्यान्तक्तन विधिसंबंधेलत्वासंभवादनुमीयमाना भावनैव विधी
यते एवं त्विहामुकोभवेदिति प्रयोगः। तत्र भवतेस्तिषत्यर्थवाविलात्मेभवतत्वव्यतिरिक्तं भावयितव्यमि
त्येवं विज्ञायते। स्त्वानेनान्यत्किं विद्वान्वयेदिति। तेन भूतभविष्यद्वर्तमानाय देशमात्रेष्वेवापारमार्थिके भवि
तव्यापारस्य भावनात्वेन विध्यादिषु। भूतादिकथनेपि यदा समस्तं व्यापारं धातुरेवाभिधत्ते तदा दध्यक्ता
११ लीदिहरतभेदाश्रयणात्। तदा विध्यादिरिधाद्वाच्यर्थमात्रे कर्तृत्वे संख्यादयश्च आख्यातपदार्थत्वेनावग
म्यंते। न भावना। नवभावनाव्यभिचारेणादोषइत्युक्तं। यत्तु द्वंदंतेष्वपि धात्वर्थएव भावनां न व्यभिचरं
तीति सत्यं धात्वर्थानव्यभिचरंतितेरवनुगम्यमानत्वात्तु न भिधेयेत्व मपि शक्यं वक्तुं। तथाहि धात्वर्थ
कारकैरेवगुणभूतैर्वगम्यते। भावनात्मा द्वंदंतेषु तस्मान्नैवाभिधीयते। ध्यौवभावप्रधानत्वादाख्या
तेन तत्संबंधेधादेवगुणाभूतकारकप्रतीतिसिद्धेनेक कर्तृकर्मभेदाभिधाने न विषयत्वेकर्तृत्वाद्यभिधानाद
वत्तदन्यथानुपपत्त्या भावनासिद्धेरनभिधानेगम्यमानापेक्ष्याणेवकरोतिसामानाधिकरण्यं। यथापच ११

तिशब्दस्यापेक्षितदत्तशब्देन तथाभूतस्यैव स्वकारकसंबंधबोधकत्वमपस्मते। अथ वा भावनोपसर्जनधात्वर्थे निष्ठास्यार्थ
त्वात्कारकत्वां धात्वर्थेनैवं संबंधसिद्धिः। स एव हि तां निष्ठसिद्ध्यर्थमपेक्षते भावनापि च तथाभूता। न्यक्ता
निरूकृतीत्यविरुद्धः संबंधः। रूपयानो तु प्रेषवाविध्यातृसत्यपि भावनानभिधाने तावत्स्वार्थपर्यवसानेन
क्रियावदंशत्रयपरिपूर्णा भावना न लब्धा कुतः। स्वव्यापारे हि पुरुषः कर्त्तृत्वेन न निपुण्यते। प्रेषस्तु परस्य। किंच
म्मभावनांशत्रयात्मिका। न हि पुरुषः स्वव्यापारे मुक्त्वान्यदनुष्ठातुं शक्तः। प्रेषाध्येषणे न मनुष्यापयंति। तेपदि
त व्यापारं कथं विज्ञापयेद्धि पुत्रं नियोक्तुं शक्नुयुरित्येवमपि भावनाद्वैयसिद्धिः। यावांश्चैवमत्रागतः क
श्चित्प्रेषः स सर्वः प्राप्तभावानुविधिरेव भवतीति विना विधिस्मरणेन प्रवृत्तानां विधायकत्वात्। अयमेव
च विधिप्रेषयोर्विशेषः। प्रवर्त्तनमप्रवृत्तिः प्राप्ते प्रेष इत्यभिधीयते। अप्राप्तप्रेषणं सर्वे विधिं वेप्रतिपद्यते
तस्मात्प्रत्ययार्थो भावनेत्युपपन्नं। ननु च यदि प्रयोक्तव्यापारो भावनेष्यते। ततः पचावधिश्रयणा
दीनि यत्नोद्यमानसः संकल्प इत्यादीनां भावनात्वं न एवंविधा वर्याइतिधातुवाच्यैव भावना स्यात्। न

वा.धा. षदोषः॥ धात्वर्थव्यतिरेकेणाप्ययमर्थो न लभ्यते। तथापि सर्वेषां सामान्यरूपेणान्यावगम्यते। सर्वत्र स्वाधिश्र
यणादौ करोतीत्यपि सामान्यव्यापारोऽत्रः प्रतीयते। पच्यादिवाच्याश्च विक्लित्त्यधिश्रयणादयः कर्म्मस्थाः
कर्तृस्थाश्च तत्र यदौदासीन्यप्रच्युतिमात्रेणापरिस्पंदरूपं निरूप्यते सा भावना यत्तु तदनुरंजनसमर्थाः क
र्तृकर्मगताविशेषास्ते तु स्या एव करणेतिकर्तव्यतांशयोर्निविशंते एवं तर्हि धात्वर्थसामान्यं भावनेत्य
तदापन्नं॥ सत्यं॥ साध्यतया सामान्यं ननु गोत्वादिरूपेण। कथमन्यदेव हि यागादौ सामान्यं करणात्मकं
१२ अन्यश्च भावनानाम साध्यत्वेन व्यवस्थितम्॥ भावनायास्त्वियमेव प्रतिपुरुषं सामान्यविशेषो भव
तः॥ तथा तत्करणभूते यागादौ समवेतं भावनाकरणांशापेक्षितं धात्वर्थसामान्यं नामयत्कर्मशब्देना
भिधीयते। विशेषणभावाद्ध्यागादयो भावनाविशेषाद्भूत्तु व्यक्तेन तद्व्यक्तिश्चेन शास्त्रप्रदेशेतु कि
याकर्मशब्दैः कदाचिद्धात्वर्थप्रयत्नश्चेति कदाचिद्भावनायाः कदाचित्तु प्रत्ययस्त्यात्तथात्वापि प्रयोगान
स्वरूपाभिधानेन॥ कुतः॥ यादृशी भावना ख्यातेधात्वर्थश्चापि यादृशाः॥ सा सैतेनैव रूपेण कथ्यतेन्यैः १२

पदेन विशिष्टा भावना शब्दो हि निष्पन्नात्मिकां सत्त्वरूपापन्नां लिंगसंख्यायोगिनीमभिधत्ते न वा भावाख्याते
नतादृश्यमभिधीयते। लिंगसंख्यारहितरूपेणागम्यमानत्वात् एवंभावार्थो पि विदितव्यः। तथा करोति भावय
तीत्येतान्यमपि श्रुत्या तावदन्याद्दृगेवार्थः प्रतीयते। कृञ्चैतावत्प्रत्यर्थकरणिका भावना। न चैवं तृयाभो
यत्नेतत्यादिष्वपीत्यपर्याये। तत्रावश्यप्रत्ययोत्थापितभावनांतरबुद्धिम विवक्षिवार्थसंवादः कर्तव्य
स्तेनादूरविप्रकर्षमात्रेणोपप्रयोगो नार्थसाम्येनैवावस्थितमनन्यशब्दवाच्यत्वं भावनायाः। सा तु तीत
मात्रेव प्राधान्यादप्येदीतरानधीनत्वाद्व प्रथमं तावत्साध्यांशमपेक्षते। भावयेत् किमिति। तत्र यावती
विधयापेता भावना तस्यां पूर्वं प्रतीतमपि विधिवचं तावन्नाश्रीयते यावदंशत्रयपूरणे भावनानुष्ठानयोग्या
न भवति विधिवप्रक्रमाद्य प्रथममपेक्षते ज्ञायते यादृशोः शेषपूर्णाय विधानमर्हतीति तादृशेः पूरयितव्ये
ति। न खलु बुद्धिपूर्वकारी पुरुषः पुरुषार्थरहितं व्यापारं वचनशतेनाप्युक्तोनुतिष्ठति। न च पुरुषार्थः स
मत्वव्यतिरिक्तेशनियातिवेन केचित्प्रार्थ्यते। ततो न्यहितितरस्यान्यस्य साध्यस्यी विधमानत्वात्। तत्र

यद्यस्यां भावनायां पुरुषार्थः साध्यः स्यात्ततः पुरुषेषु प्रवर्तमानेषु प्रत्ययस्य प्रयोऽस्करीत्वं द्योत्यते।
तेनयद्यपि समानपदोपादानप्रत्यासत्तेर्द्धात्वर्थः साध्यांशपूरणायोपप्लवते। तथाप्ययोग्यत्वान्निराक्रि
यते न हि प्रत्यासत्तिरेवैकैसंबंधकारणं किंतर्हि योग्यताद्यपि। तथा वा वद्यतिरस्य येनार्थसंबंध इति।
किं वा संबंधमात्रमुक्तैव स्वकृत्याधात्वर्थभावयोः। तदेकांशनिवेशेनुव्यापारो स्यानाविद्यते। संबंधमात्रं ह
13 वीनिर्वृत्तव्यापारयोः कृतावन्यतरांशविशेषो योग्यत्वादाश्रयितव्यस्तद्यदि साध्यांशादेकप्रत्ययोपा
त्तेन प्रत्यासन्नतरेण विधित्वेन प्रच्याव्यते। ततोंऽशांतरेणानूनं संबंधस्यत इत्येवं प्रतीक्ष्यते। किं वा सा
ध्यांशे पुरुषाणां वप्रत्ययो नाभियोऽतकः॥ स्वयमेव हि ज्ञातं तत्कर्तव्यं पुरुषाः स्यदा। यत्र हि शास्त्रा
धीना पुरुषस्य प्रवृत्तिः तत्र तत्संनिकर्षविप्रकर्षावपेक्ष्येते। साध्यं पुनः स्वर्गपशुपुत्रग्रामादिप्रायो
वशास्त्रात्। सर्वैपुरुषाः प्रतिपद्यंते। ततश्चनावयोः किमप्यपेक्षितमात्रे विनैव तावत्कामुशेतावद
वगतपुरुषार्थः कश्चिदिति तत्र विशेषमात्रमनवगतत्वादपेक्ष्यते। तदपि वनसाध्यात्मन॥ किं तर्हि 13

तद्भावनाविषयत्वेन तत्र श्रुद्रस्थस्यापि स्वर्गादेरेवकृतास्यदस्यसंगतिश्चभावार्थसंबंधः स्वत्वनपेक्षितः क्रि
यते विध्यानर्थक्याद्भवाव्येतत्तरांश्रुतिः। किंवा नवेनेयस्यकर्तृत्वेकथं विरद्धधारितेद्भवाव्येपरवाक्येवास
साध्यत्वेप्रयुज्यते। नवात्रधात्वर्थादेर्नेवनक्रियासंबंधोऽवगतः। स्वर्गादीनां तु कामशब्देपपदसंबंधाद्भवनसं
बंधोविज्ञायते कुतः। स्वर्गकामस्यादिति। हि स्वर्गादिः प्रार्थ्यते नचैतेनासौ भावनापेक्षः प्रयोज्यत्वेनग
म्यते। ततो वक्तव्यस्वर्गादिसाध्यांशाभावनाकेननाद्वयेदित्येवं करणमपेक्षते। तत्रवशाख्याधीनप्रवृत्तित्वा
त्समं निकषोदाकाश्रीयमाणे प्रमाणीतराद्ययोग्यत्वायोग्यत्वयोरज्ञानाद्विध्यविरोधाद्वात्येतप्रत्यासत्य
परिस्थितधात्वर्थातिक्रमकारणाभावात्रसर्वफलभावनानीवकेनविद्धात्वर्थविशेषेणविनानुपपन्नेर्यो
गेनेत्येवं विज्ञायते। यद्यपि यागः स्वयमेव तावदनिष्पन्नस्तथापि स्वसाधननिष्पादितः सन्साधयिष्य
ति सर्वमेव वक्तव्यं। किं निःष्पन्नेकदा विदनिःष्पन्ने वप्राक्शास्त्रप्रवृत्तेर्निःपत्तिः क्वचिदुपयुज्यते फलसि
द्धिकालमात्रोपयोगि वाकरणानिष्पत्तेः। प्रमाणावगतेत्रिकालवर्त्तिनामपि साधनत्वाविरोधस्तस्मा

घगादीनांकरणत्वे। तत्रापूर्व्वद्वारेणेतितच्छब्देभ्यो पूर्व्वप्रतीतिः अतश्चैवमपि समुदायार्थः संभवति। येनावा
र्थो भावनाप्रयोजनः कर्म्मशब्दायस्त्यादयस्तेभ्यः क्रियाप्रतीयतेति। ननु वा क्तेन कर्म्मकरणसंबंधन्या
येन सकर्म्मकधातुयुक्तो देवाख्याता द्भावनावगतिः प्राप्नोति। तथाहि। येन छित्तत नेम्मीवेः। किमित्यपेक्षो
वरुध्यते। तद्योगीतिनधा त्वर्थीन कश्चित्स्यादकर्म्मकः। यदि वा सर्व्वधातूनां सकर्म्मकत्वोपपत्तिरथवा कर्म्म
केभ्यो भावनया न भवितव्यं। नैषदोषः। कुतः। अन्यदेव हिधात्वर्थप्राप्यं कर्म्म सकर्म्मके। अन्यदेव सम
१४ वेत्रप्रत्ययार्थनिवेशनम्। ओदनं पचति ग्रामं गच्छतीति धात्वर्थो पवर्गलभ्यमेकं कर्म्म। परे पुनर्भावना
कर्म्मतत्र कदाचिद्धात्वर्थ कर्म्मैव भावनाकर्म्मत्वमपि प्रतिपद्यते। पाकेनोदनं भावयतीति। कदाचित्पु
नः स्वकर्म्मविशिष्टधात्वर्थयुक्ता भावनाकर्म्मान्तरेणाकर्षति। ग्राम गमनेन स्वार्थं भावयति ओदनं पाके
नेति। तत्रैतद्धात्वर्थोत्पत्तरतस्तदवाप्यमात्रत्वेन गम्यमाने धात्वर्थीतरतिरोहितमपि भावनाकर्म्मतया
सर्वत्रावधार्यते। तत्र प्रायेणैवं कामशब्देनैव सम्बन्धमापद्यते। सुखकामस्त्वासीत स्वर्गकामः यजेतेति १४

तिसत्यप्या सिद्धेत्योरकर्म्मत्वेयः प्रत्यये नकरोत्यर्थो निर्वृत्तकर्म्मत्वेनसुखादीन्यवधार्यते। तेनकरोतेः
सर्व्वदासकर्म्मकत्वात् अकर्म्मकाख्यातानामपि तत्सामानाधिकरण्यदर्शनात् किंकरोत्यास्ते किंकरोति
शेत इति सिद्धेः। एवमादिष्वपि सकर्म्मिकाभावेनाध्यवसेरपि तुल्यकर्म्मपृष्ठत्वादेव तत्तेष्यते। तदुक्तं खिल्वेवपुत्रादेःक
र्म्मत्वं नावनाश्रिता। तस्मात्सकर्म्मकाकर्म्मकयोरविशेषादासनेन नावयेदित्यपिप्रयोगसिद्धिः। कस्तर्हि
कर्म्मकाकर्म्मकयोर्भेदः उच्यते। सा ह्यस्याभिवारेणाधात्वर्थाभ्यन्तरकर्म्मनाद्य। सकर्म्मकः सधातुरुच्यात्यारेप
र्यत्वकर्म्मकः। आसनशयनादीनां तु नियमेनानेतत्तर्थाणावेदंतदिति कर्म्म निरूप्यते तेनाकर्म्मका इत्यभि
धीयंते। पविगम्यादीनां तु विक्लियत एवयुष्यमानसाध्वीसंबंधिकर्म्माद्यभिवारात्सकर्म्मकत्वं न तु भावना
विशेषणात्वेकस्थिति विशेषः। सेयं भावना शब्दयपरिपूर्णा सती सर्व्वकरणानामुपायाननुगृहीतानो करणत्व
नुपपत्तेः कथं भावयेदितीति कर्तव्यतामपेक्षते। सा च प्रत्यक्षादीनामनुग्राहक तर्कशब्दस्य भावादत्ययंतंशा
स्त्रगम्येति यथा संनिकर्षतदसंन्नवा ह्ययथाकथंचिदुपस्थाप्यमानाशास्त्रानुसारेण कृत्याक्रपदेशेनचो

दनासामान्याद्यतिदेशेनवाद्यत्तात्दृष्टोपकारद्वारेणान्यथानुपपत्त्याकल्प्यते।ततः परिपूर्णत्वादनुष्ठातु
योग्येति विधीयते।तद्विधानाच्चार्थापत्त्या यागादिविधानमप्याक्षिप्यते इति भावार्थसूत्रं। नन्वस्ति केचित्कर्मश
ब्दाः न भावार्था इति यागो यजनमिज्येत्युदाहरंते चेत्तन्न।आमनाधिकरणे सिद्धत्वेनैकत्रिकाद्युदाहरणेषु या
गादिकरणत्वेवोदनोत्तरकालभाविकर्मशब्दत्वेनपारतंत्र्यात्फलज्ञानेष्वतंत्राणां कथंचिदपि भावार्थत्वाशं
कासंभवात्।यागादयो हि स्वातंत्र्येणापि करादिदनुमानाद्भावार्था एवं का विधास्फ रिति।केचिद्भावार्था न क
१५ र्मशब्दा यथा भावयेत्कुर्यादिति वोदाहरणं। गृत्वादयस्तु प्रयोजव्यापारवचनत्वान्नैव यथा वर्णितभा
वार्था इत्यनुदाहरणं।तत्र यथा कथं विशिष्टं तत्वकृत्यर्त्स्। भावशब्द एकोनीयते।नेत्तरौ तावपि तु प्रयोक्तृव्या
पारांशेन कथं सिद्धावार्था वित्युदाहृतौ। अथवा द्वितीयसूत्रार्थव्याख्यानेनतावता प्रयोजनत्वेनांश
वाविद्येनास्तीति विनापि सकलार्थाभिधानाद्भवंति भावार्थाः ४।कथं पुनरमीन्कर्मशब्दाः यदा धातु
मात्रं कर्मशब्दत्वेनोक्तं। निर्विशेषस्य सामान्यस्यानुष्ठातुमशक्यत्वादकर्मशब्दत्वं।अतो विशेषवावि १५

नामेव धातूनां कर्मशब्दवाच्यत्वाश्रयणाद्बोध्यमेतत्। यदि श्येनचित्रासर्वपूर्णमासशब्दाः फलैः संबंधेरंस्ततो याग
स्यकरणत्वाभावात्सामानाधिकरण्यनिमित्तनामधेयत्वानुपपत्तेः प्रसिद्ध्यादिनिर्गुणविधित्वमेव स्यादतः श्ये
तएतस्मिन्नधिकरणे द्रूत्यादः। कस्मात्पुनरिदं तत्रैव न नीतं। प्रमाणलक्षणे नासंबंधात्। अथ नामधेयत्वं कस्मा
दत्र नानीयते। नेदं लक्षणेनासंबंधात्। तस्माद्यथान्यासमवस्थितयोरर्थात्पौर्वापर्यसिद्धिः। नन्वेषामर्थिन
ति। फलपदाभिप्रायं विविभक्तित्वादिति। संबंधनिमित्ताख्यातविभक्तिविगमादथवा निष्पन्नार्थाभिधा
यित्वविभक्तिविशेषयोगो विविनक्तित्वं। तस्मान्न द्रव्यादिशब्दानां फलसंबंध इति। आह च साध्यमान
संबंधः सर्वदा भावनाश्रयः। तेन तस्य न सिद्धिः स्यात् भावनाप्रत्ययाद्दते। सर्वेषां भावार्थ इति चेत्। न तावत्प्र
त्ययस्य सूक्ष्मपूर्वं प्रतिपादने। न च धातोस्तस्य त्याज्ञान्तो वाच्यतः समं। यदि भावनावसत्त्वे वा पूर्वप्रतिपाद
कत्वमिष्यते धातोर्वा प्रत्ययनिरपेक्षस्य ततो नामपदे दुर्बलः स्यादिति तु यथैव धातोः प्रत्ययसंबंधानुग्र
हीतस्य भावनानुरंजननिमित्तं करणत्वावित्वं भवत्येवं नामपदस्यापीत्यविशेषः॥ ॥येषामुत्पत्तौ स्वे प्र

प्रागेरूपोपलब्धिस्तानि नामानि तस्मात्तेभ्यः परा काष्ठा तत्त्वा स्वप्रयोगे यदुक्तं यदेकस्माद्पूर्वोत्तदेतरत्त
दर्थं भविष्यतीति तदुक्तं तावदस्य धर्मत्वाद्विशेषं प्रदर्शयति। कथं वाक्यदृष्टप्रसंगादिधर्म्मानेष्टुःपदे पदे। ना
म्नात्फलेन संबंधे परिहारो न तस्य वा। एकस्मात्सदृष्टे परिकल्पिते यदीतरस्य दृष्टार्थत्वेन तादर्थ्यं मन्यते। त
तो लाघवं लभ्यते। अथ तु तादर्थ्यसिद्धये ततोपि पुनरदृष्टं कल्प्यत एव ततो वरं फलेनैव सर्वाणि संबंधा
१६ नि। न च संबंधं भवेद्रूपके शास्त्रयाणां। नाम्नाम्नायफलसंबंधे वस्थं भावयेत्तद्गुणहार्थो भ्यपगतश्चः स्व
यं निःपाद्यः। सिद्धरूपस्य नामार्थस्य न शक्नोति दृष्टेनोपकर्तुं। न हि नामार्थस्तमेव प्रदृत्ते शब्दप्रयोग
वेला। यामेव निष्पन्नतया गम्यमानत्वात्। अपेदराणी यस्य स्वासिद्धत्वेनायोग्यत्वात्प्रफषतस्मिन्नि
तिवाभिधेय एव प्रयोगः तदा घारे वा हि निःपन्नरूपोपलब्धिः अनुत्पन्नत्वे क्रियायाः रूपस्य वस्तुत्वे विन
शिच प्रदर्शनं निष्पन्नस्यापि क्वापि केवचन पुनः पुनर्निष्पत्त्यपेक्षोपपत्तेस्तेभ्यः परा काष्ठा काकांक्षा
निष्पाद्यत्वेन वा प्रधानाकांक्षा न विद्यत इत्यपव्याहारः। अथवा तेभ्यः परा दूरे ज्ञाकांक्षेत्यर्थः। कुतः १६

भूतत्वादेवेतिस्वरूपकथनार्थमुपन्यस्तंनिष्पन्नत्वादेवेतिपुनरंतेतदेवहेतुत्वेनोपदिष्टंमूलकारेण॥ये
धातूत्पन्नार्थेहिप्रयोगोनविद्यतेतान्याख्यातानितस्मात्तेभ्यःप्रतीयेताश्रितत्वात्प्रयोगस्य॥आख्यात
वर्तीधात्वर्थःसाध्यरूपःप्रतीयते।तस्मिन्फलवतीष्टेतुनाम्नोदृष्टार्थतेष्यतेधात्वर्थस्तावत्प्रकृत्यैवसाध्या
त्मकोविशेषस्त्वाख्यातगतेनप्रत्ययेनोच्यमानःसयदिफलस्साधनत्वेनबोध्यते।ततःसिद्धरूपत्वात्तस्यस
धनाकांक्षायांसत्यांनामपदंगुणविधित्वेननामधेयत्वेनवान्यथापिदृष्टेनैवतादर्थ्यंलभ्यते।ननुना
मधेयत्वपक्षेनामपदमपिसाध्यार्थमभिधास्यतीतिधातुतुल्यंस्यात्॥नातस्यफलसंबंधेगुणविधित्वेन
सिद्धार्थत्वादपिवासाध्यात्मकोपिधात्वर्थोपदान्नाम्नाभिधीयतेतदाद्रव्यवद्देवासौनिष्पन्नात्माप्रतीय
ते।यद्यपिवस्तुस्वरूपेणधात्वर्थःसाध्यस्तथापिनामपदेनोच्यमानोलिंगसंख्यायोगित्वात्सिद्धरूपेणा
भिधीयते।अभिधानकृत।वाक्यार्थज्ञानेत्वनिर्वस्तुकृत॥तस्माद्युक्ताधात्वोरेवाकांक्षाननाम्नइति।किंचआ
श्रितत्वात्प्रयोगस्येत्यधुनाशब्दप्रत्यासत्तिकृतोविशेषोभिधीयते।पुरुषव्यापारात्मिकायांहिभावनायां

याच्चार्थोपक्षेपोपि पुरुषस्याश्रितस्तदतिक्रमहेतुत्वाभावाच्चनानर्थग्रहणं तस्माददृष्टविशेषः॥ चोदना
पुनरारंभः॥ सिद्धं कृत्वापूर्वं तत्प्रतिपत्त्युपायत्वाद्विशेषविचारः कृतस्तस्य त्वसिद्धत्वमेवाप्रसिद्धम
तस्तद्देवतावत्प्रतिपादनीयमित्यत आह॥ फलाय विहिते कर्मणि क्षणिके चिरभाविने तत्सिद्धिर्नान्यथे
त्येवमपूर्वमपि गम्यते वेदवाक्योपात्तस्वर्गयागादिसंबंधान्यथानुपपत्त्या तत्त्वोदनयैवापूर्वमपिवे
दितं न विषयीति प्रमाणवत्तास्मादस्यापूर्वमित्यत्रापरे निपुणंमन्यास्तन्निकरणमाहुः॥ प्रमाणपंचका
ज्ञानादपूर्वं षष्ठगोचरः। तस्माद्दर्थानामेतन्न वक्तव्येन गम्यते। वस्तुत्ववबोधनार्थानि हि प्रत्यक्षादी
नि पंचप्रमाणानि। तच्च वस्तुनि न प्रवर्त्तते तदभावेनाभावात्मनैव गम्यते। न चापूर्ववस्तुनि प्रवर्त्तते तस्मा
त्सर्वप्रमाणापूर्वत्वाद्दर्थनाभेदासद्रूपमपूर्वं प्रतिपत्तव्यं। तत्र प्रत्यक्षेण तावन्न गम्यते। रूपाद्य
नात्मकत्वेन चक्षुरादिभिरसंबंधात्। नाप्यनुमानेन केनचिल्लिंगेन सहादृष्टसंगतित्वात्। न हि वि
शेषतः सामान्यतो वास्य केनचित्संबंधोनुभूतपूर्वः सर्वथैव च वस्तुसत्तावबोधायानुमानमप्यपर्या

प्रमित्युक्तम्प्राकृपदवाच्ये नवेतस्य वाक्यैकेश्रूणुमः क्वचित्। शब्दगम्यत्वमपस्यते न नैवोपपद्यते। आग
मिकत्वमप्यस्य पदेनैवोच्यमानस्य स्याद्वाक्यगम्यस्य वा। तत्र पदं न तावत्किंचित्सा दावेतस्य वाचकमस्तिय
त्वपूर्वमिति। तदस्यार्थत्वात्सुतरामस्तित्वं वा घटते न च प्रमाणान्तरानवगते र्थे पदं प्रवर्त्तते। न वाक्यांतरेणा
प्रमाणामिति स्थितं। तथा वाक्यस्यावाचकत्वादेवाप्रामाण्यं न च केचित्पदार्थाः श्रूयंते। येषां भेदः संसर्गो वा
पूर्वं भवेत्। येपि शब्दांतरादयः श्रुतिलिंगादयश्च शब्दप्रकाराः तेपि स्वभावसिद्धवस्तुभेदविनियोगाव
कारणं न सद्भावे कस्यापि विदितपूर्वं प्रत्यमाणां उपदेशानवगते वातिदेशोपि न प्रवर्त्तते विधिप्रतिषेधयो
श्चाद्वसमस्तस्य वेदस्य न क्वचिद्वस्तुस्वरूपप्रतिपादनार्थत्वं भवतीति नागमगम्यमपूर्वं। न चादृष्टपूर्वस्या
दृष्टसदृशस्य चोपमानविषयत्वं। कामं वानुपलभ्यमानशब्दविधानादिसादृश्यादनावात्मकत्वोपमानप्रसं
गतेः। दृष्टार्थापत्तिस्तावद्धर्मास्तित्ववद्देवतापि निराकर्त्तव्या। स्वामा विकल्पेनापीश्वरदरिद्रादिवैचित्र्या
पपत्तेः। श्रुतार्थापत्तिरपि कीदृशी भवति। यत्र प्रत्यक्षेण वान्यथा तु पपत्तिर्दृश्यते। न च कल्प्यमानोर्थः

केनचिद्विरुध्यते। तद्यथा स्रुवेणावद्यतीत्युक्ते न कथंचिदपि मांसपुरोडाशादीनि तेनावदातुं शक्यंते इति
प्रत्यक्षगम्यत्वात्। अपि च। तत्रापि प्रसक्तेरेवं कल्प्यते द्रवाणामिति। न चैषा कल्पना केनचिद्विरुध्यते।
श्रुतहान्यश्रुतकल्पनाभावात्। अपूर्वं तु न कदाचित्फलसाधनत्वेन संभाव्यते। यतोऽन्यकारणनिषेधे सति
तद्विषयापरिशेषसिद्धिः स्यात्। यदि त्वन्यनिवृत्त्यैव परिशेषः प्रकल्प्यते। शशशृंगनिमित्तत्वं फलानां
१८ किं न गम्यते। न हि कारणांतरप्रतिषेधमात्रेण पूर्वनिमित्तता गम्यते। अत्र विषाणादिभिरनेकांत्या
त्। अपि चा यदि तावदपूर्वं यागस्य साध्यमिष्यते। ततः श्रुतं स्वर्गं परित्यज्याश्रुतं कल्पितं स्येत्। अथ
फले प्रतिसाधनभूतं ततः श्रुतयागपरित्यागात्सैवानुपपत्तिः। न च प्रकारांतरेणैतन्निरूपयितुं शक्यते। ते
नागमप्रामाण्याद्यागादेव फलेन भवितव्यं। कथं विनष्टः साधयतीति चेत्। यदि शास्त्रादेव गम्यते किं न
वेत्ति विरुध्यते॥ ध्रियमाणेन वा फले साधनीयमित्यत्र किं प्रमाणमिति। अपि च। आकाशादीनि नित्या
वस्थितानि कस्मात्फलं न साधयन्ति यदि स्वरूपमाणातिरेकेणावस्थापित्वसंभवात्। अपूर्वेण फलं सा १८

ध्यत इति कल्प्यते। ततो ऽपरमात्काशादेरेव कल्प्यते। तस्य हि स्थाने सद्भावाव्यपितावत्प्रसिद्धो केवलं फल
निमित्तत्वमाश्रयणीयं। अपूर्वं तु सद्भावात्प्रभृति सर्वैर्निः प्रमाणैः कल्पनीयं। अश्रयस्यात्मसंबंधिना केन चि
द्व्यवस्थितेन फलेदातव्यमित्यभिप्रायः। तथा सत्यपि। यद्युरेवात्मनोपागैः संगतस्य स्थितस्यात्वा। निमित्त
त्वं वरं क्लृप्तं लाघवो हि तथा सति। यदीयागस्य विनाशित्वादन्येन तत्संबंधिना फलं साध्यमानेयागेन सा
धितं भवति। ततो लाघवादतिक्रांतयागेनात्मनैव वरं साधितत्वात् यद्वा कर्म विना ऽगोऽयं फलेन ऽसं
घटयिष्यति। भेदिया गविधानाद्धितस्य तेन कल्प्यते। विनाशिनि कर्मणि वोदिते क्रियद्दृश्यते। कर्म
त्वविनष्टे शास्त्रप्रत्ययाद्धि कालांतरे फलं भविष्यतीति निश्चीयते। यद्वयं प्रतीत्यो पजायते। तत्र स्यनि
मित्तमित्यवधार्यते। तस्माद भावनिमित्तमेव फलमस्तु। स्यादेतत्। नच्छविदवस्तुनः साधकत्वं दृष्ट
मिति। तदुच्यते। अपूर्वस्य नाधो दृष्टेयेनाश्रीयते। तदवश्यं कैर्त्यलो। किं निमित्तधर्मोतिक्रमे किमपू
र्वनिमित्तत्वे कल्प्यते। उत भावनिमित्तत्वमिति। क्लृप्तभावनिमित्तत्वातिलघ्वेनेन कल्प्यनिकापू

वेनिमित्तत्वपरिग्रहोप्युच्यते। किंचायदियैकांततोवृपुःशब्दात्कालांतरफलंततद्वारेवकल्प्यतनि
मित्तंवक्तव्यं। किंवनाक्रियाफलसंबंधप्रतिपत्तिमात्रंचरितार्थोसुवादनाद्वत्तुपात्तेकालांतरेकर्मध्वंसाव
दानंतर्यगम्यमानेकुतएतत्कालांतरभाविफलेतत्सिद्ध्यर्थंचापूर्वंकल्प्यतइति। तत्रेत्तत्स्यात्कृतेकर्म
ण्यनंतरंफलमनुपलभ्यकालांतरफलोत्पादद्वारमपूर्वंकल्प्यमिति। तदप्युक्तं। कुतः। पूर्वंनिश्चित
१८ शास्त्रार्थप्रयोगोहिप्रवर्त्तते। प्रयोगोत्तरकालेतुनशास्त्रार्थोऽवधार्यते। नह्यविद्वान्विहितोस्तीतितत्र
तावदवश्यंयावच्छास्त्रगम्यंतत्सर्वंप्रागनुष्ठानादवगंतव्यं। नचतत्कालेकर्मफलकालवियोगज्ञान(
कारणमस्ति। यच्चशास्त्रप्रवृत्तिवेलायांतदंतर्गतत्वेननावधारितंतदुत्तरकालमेवावधार्यततिकुत
एतत्। अपिचास्वर्गकर्तृष्वाशुरकृत्वादिगुणंसंप्रतीयते। तेनचप्रतिबद्धत्वान्नायोपत्तिरपूर्वेनाकृ(
ष्टरूपतएवानंतरफलानुत्पत्तिकारणंवैगुण्यमितिनकालांतरफलसिद्ध्यर्थमपूर्वंकल्पनीयं। अन्ये
कोतिकीर्त्तितदाथोपत्तिः। वैगुण्यमेवचवरमननुभूतमपिकल्प्यतां। नचजन्मांतरफलोत्पत्त्यर्थम १८

मपूर्वकल्पना॥ कृतः॥ सुखदुःखात्मकत्वेन समानेष्वेव जन्मसु॥ क्रियानंतरमेवेहस्तःस्वर्गोनरकावपिन
हि स्वर्गनरकौ नाम निरतिशयसुखदुःखस्वभावौ देशविशेषात्मकौ वाप्य विहैव जन्मनि नानुभूयेया
तां अलौकिकानां जिहासायादित्वानुपपत्तेः॥ ये तु लौकिके प्रकृष्टे सुखदुःखे ते कर्मानंतरमेव समना
प्यंते इत्यविशेषः॥ किं वा प्रतिषेधेषु वापूर्वं न शास्त्रार्थेन जन्यते॥ तदतिक्रमजन्यं तु न वेच्छापूर्वकं॥
ब्राह्मणो न हंतव्य इति हि निवृत्तिः शास्त्रार्थः॥ न च कालांतरे तया किंचिज्जनयितव्यमिति नापूर्वकल्प
नामपेक्षते हननं त्वस्य तु नरकपातः फलं तद्यदि तेनापूर्वं जन्यते॥ ततो हननस्यैवोदितत्वाल्लौकिकक्
क्रियाजन्यं तदपूर्वं न वेदमूलं स्यात्॥ कल्पितमपि तन्निष्क्रियत्वान्नैवदेशांतरेनशनीरादिप्रायए
समर्थमित्यनर्थकं॥ न चाम्याश्रयः संभवति क्रियाश्रयस्य पुरोडाशादेर्विनष्टत्वान्नद्धतिनेकेतातं(
भानुपपत्तेः एवमंगापूर्वाण्यपि निराकर्त्तव्यानि॥ किं च ग्रंमानियदिवापूर्वं कुर्वत्याराद्वचस्थितं॥ अ
संबंधात्प्रधानानां नस्या तेनोपकार्यत्तान हि कल्पितमप्यंगापूर्वं प्रधानैरसंबध्यमानमुपकर्तुं

समर्था।नवामूर्त्तप्रधानेतदपूर्वव्यानियवितुंसमर्थायदपिवप्रोक्षणादिनिमित्तंद्रव्यसंनवा।यितद
ष्यितन्मात्रोपदक्षयित्वादन्यत्रासंचरत्नैवफलसाधनस्यापूर्वस्योपकुर्यात्।अथत्वंगापूर्वाराप
पियजमानात्मन्येवावतिष्ठेरन्।एवंसतिपुरुषार्थत्वापत्तेःकर्मांगत्वहानिःस्यात्।अपिचायुग
पत्प्रयोगवचनेनग्रहणादंगापूर्वैर्युगपदेवोपकर्त्तव्यं।नचपरस्परेणासंबद्धानांयोगपद्येसंभव
२० तिनचैषांकाश्चित्संबंधहेतुरस्ति।एतेनप्रधानापूर्वाणांफलयोगपद्यंप्रत्युक्तं।तस्मात्कृतत्व
मात्रेणाप्रधानेपुरुषेफले।अंगानिचप्रधानेषुजनयंतीतिगम्यते।नवापूर्वस्योत्पत्तिरभिव्यक्ति
र्वापयद्यते।कुतः।नतावद्युगपज्जन्मकर्मभिःक्रमवर्त्तिभिः।नचानवयवत्वाद्वक्रमेणापिप्रती
यते।एवंतावत्तोत्पाद्यते।नवाभिव्यज्यतेकथं।इंद्रियार्थोभयेषांनःसंस्काराद्यक्तिरिष्यते।नचया
गादिभिःकिंचित्संस्कृतंसंप्रतीयते।सर्वाभिव्यक्तीनांत्रयान्यतमसंस्कारद्वारत्वात्संस्कारांतरमवश्यंक
ल्पनीयं।तत्रचपुनःसएवक्लेशइत्यप्रमाणता।यदिचक्रियानंतरमपूर्वमुपलभ्यते।ततोभिव्यज्यत २०

इतिब्रूयामयदिवास्यप्रागस्तित्वेप्रमाणंनचेन्नतुतदुत्पत्त्यभ्यस्तातिसर्वथानारूपपूर्वेनचैतत्सूत्रेतत्प्र
तिपादनेविमृष्टमित्यव्याख्यानमेतत्॥ अथोच्यते॥ यदिदंस्वर्गमितिपरिकल्पितंविग्रहवदिवापूर्वंन
द्भिर्निरिरा। नीयते। ननैनास्माकंकिंविद्धिनुष्यते। यतोनैवेत्तताहृशंकस्यविदिष्टं। किंतर्हि। कर्मण्यः प्रा
गयोग्यस्यकर्मणः पुरुषस्यवा। योग्यताशास्त्रगम्यायाया। परासापूर्वमिष्यते। प्रधानकर्मणामंगकर्मणां
वाप्राक्करणात्स्वर्गादिप्राप्त्ययोग्याः पुरुषाः कृतवश्चतत्कार्ययोग्यास्तामुभयीमप्ययोग्यतांबु
द्ध्याप्रधानैरंगैर्यज्यतेयजन्यतइतिश्रावश्यंसर्वेणाभ्युपगंतव्यांश्चसत्योंतस्यामकृतसमत्वेत्र
सेगात्। सैवचपुरुषगताक्रतुगतावायोग्यताशास्त्रेस्मिन्नपूर्वमित्युपदिश्यते। यत्तुप्रत्यक्षादिग
म्यत्वमस्यनास्तीति। सत्यंश्रुतार्थापत्तिव्यतिरिक्तेनैनावगम्यते। सत्वदोषः। किंकारणं। श्रुतार्थापत्ति
रेवैकाप्रमाणंतस्यचेष्यते। शब्दैकदेशभावाच्चस्वार्थत्यागमेवनः। येनवाक्येनयागात्स्वर्गोभवति।
प्रयाजादिभिश्चप्रधानोपकारोभवतीत्येतद्बोध्यते। तेनावरूपंविनष्टानामविनष्टानोवेषांकापिल

कार्योत्पादनशक्तिरस्तीत्यभ्युपगंतव्यं ।सर्वेषां भावानामशक्तानां कार्याभिनं भावानू नियोगतश्चात्रा
तीतानामेवशक्तिरेष्टव्या ॥ कुतः ॥ क्षणिकावयवत्वेननैकस्यापि कर्मणः ॥ कथं विद्युगपद्वृत्तिः फ
ले किमुतसूयमा ॥ यदेव हि कर्म गृहीतं तदेव क्षणिकं सूक्ष्मावयवत्वात् फलप्रतिपुगपद्भवितुम
समर्थं ॥ किमुतयान्यनेकात्मका निदर्शपूर्णमासप्रभृतीनि । यदा हि पूर्णमासो न तदा दर्शः यदा
२१ दर्शस्तदा पूर्णमासश्चिरविनष्टस्तथैकस्मिन्नेव समुदायेप्या दाग्नेयस्तदाग्नीषोमीयोपांशुया
जौ नस्तः यदैतयोरेकः तदेतरौ । न विद्येते इति यौगपद्यासंभवात्तद्दर्शपूर्णमासस्तदेवापवा
वाकावित्युनुषेशक्तिमनाधायैव विनश्यतः ततः प्रागवस्थातुल्यत्वादुत्तरकर्मणां पूर्वैः सहस्र
पतः शक्तिमेवासाहित्याभावात् । न केवलकरणात् कश्चिद्विशेषइति घटइति साहित्यसामर्थ्यं न स्तु तं फ
लसाहित्यासंभवन्यानोपपद्येत । नहि केवलो दर्शस्तत्साधनत्वेन श्रुयते । तदेतं वाक्यमनियोगतश्च
कर्मानंतरफलोत्पत्त्यादिनापि सर्वकर्मतिसाभ्युपगंतव्या ततश्चयस्यैवानंतर्यं तदेव केसाधनं २१

प्राप्नोति। नेतराणि चिरविनष्टत्वात्। अथ तु सर्वेषामपूर्वाख्याः शक्तयस्तिष्ठंतीति तत्तत्स्वरूपालीमतं त्व
त्वान्नेष्टव्यं सत्त्वमपि शक्तिगतमेव यौगपद्यं व्यवहारं गत्वाद्यापरिष्यते तथा वाह। शक्तिभिः सर्वेन्नावा
नां व्यवहारानुपातित्तौ। तेनान्यदेशकालेपि रूपैताभिः स संसिद्ध्यति। लौकिकैर्वापि यत्कर्मफलं कालांत
राद्भुतौ। तत्रापि शक्तिरेवास्ति न त्वपूर्वं गिरस्यते। यान्यपि च लौकिकानि कृषिप्रभृतीनां। अध्ययनप्रवृत्ती
निकर्माणि कालांतरफलत्वेनेष्यंते। तेषामपि स्वरूपावस्था नास्त्येव वा संस्कारैरेव तित्सद्ध्यर्थे व्यवहार
सिद्धिः। तत्त्ववैदिकत्वात्संस्काराणां पूर्वशब्दाभिधेयत्वेन प्रसिद्धाः। तेन प्रागेवानुष्ठानात्काम्यश्रवणादेव
तत्यामेवर्द्धीणिकानेकांग प्रधान प्रयोग साध्यं फलं विदित्वा शास्त्रप्रत्ययादेषा बुद्धिर्भवति नूनं केना
प्यात्मना समस्तान्येग प्रधानानि फलकालेयावत्तिष्ठंतीति। प्रत्यक्षेण स्वरूपतं गदर्शनान्न शक्तिव्यति
रिक्तात्मनावस्थानोपपत्तिः। यत्तु श्रुतस्यान्यश्रुतपरिकल्पना प्रसंगइति। तन्न। यागदेवफले तांद्विश
क्तिद्वारेण सिध्यति। स्वर्गस्तेशक्त्यात्मकं वा तत्फलमेवोपजायते। यदि स्यसैवंविना केनचित्फलेस

ष्येत। तदा ह्येषदोषःस्यात्। यागो हि तया तु शक्त्या साध्यमाने यागे नैव साधितं भवति। सर्वेषां घनाना
मिष्टफलप्रवृत्तावोत्तरालिकव्यापारावस्थाभाविलात्। अथवा सर्वमेवैककार्यं दध्यादिक्षीरादेरुत्प
द्यमानेन न सहसैव स्थूलेनैवात्मनोत्पद्यते। किं तर्हि सूक्ष्माणि तावद्रूपांतराण्यनुभवत्येवं स्वर्गादयो
ऽप्यंकुरादिस्थानीयां तावदपूर्वावस्थां प्रतिपद्यंते तथा चोत्पद्यमानतया तत एवोत्पन्ना भवंति एतावान्ने
२२ ववात्ववर्त्तमानः कालो यदुतसेकल्यात्प्रवृत्त्या सर्वोत्पफलावयवोपमो गतः। आह वा काष्ठैः पक्त
व्यामित्यनेनो निर्दिष्टा ज्वलनक्रिया। अंकुरे तप्यमानेव वृक्षोऽप्युत्पन्न इष्यते। यत्तु संभावनापदमपूर्वेना
रूढमिति। तदयुक्तं। कुतः। विनाशिलिंवनाविज्ञातसाधनं लोकवेदयोः। असंभावितसामर्थ्यस्यापित्वं
यो द्युते कथं नूनं विनष्टस्याप्येतस्य सामर्थ्यफलनिर्वृत्तिकालावधियावदास्ते इति हि यावन्नावधा
र्यते। तावद्विनाशिनी क्रिया चोदयितुमेवाशक्या। तस्मात्संभावनावधारणावप्रथममेवप्रसिद्धेति।
नवाति क्रांतया गम्यः पुरुषेभ्यः फलोदृतिः। अतिक्रांतानतिक्रांतविशेषस्त्ववन। क्षिति हि। यदि ह्यनादि २२

तसंस्काराय यागा एव न स्युः पुनस्ततः प्रागवस्थातुल्यत्वादतिक्रांतानतिक्रांतयोः को विशेषः स्यात्। आत्मत्वे
तावद्विशिष्टमुभयोः यागत्वमपि हि विनष्टकृतयागयोस्तुल्यं न च क्रियारहितस्यावस्थांतरगतस्य व-
कर्तृत्वं भवति एवं च कर्तृशक्तिस्थितिष्वपीतिवत्। न तस्याः प्रागपि यागकरणाद्विद्यमानत्वेनाकारणत्वा-
त्। अपि च। यदि पुनरुभयोः फलसाधने समर्थकर्मणोः शुश्रूमाणानां अविशिष्ट इत्येकरूपफलप्रसंगः। तथैकेन यथा-
गेन बहुभिश्चातदतिक्रमलक्षणालक्षितत्वं विशेषश्च दूषयाजिनः फलविशेषो न स्यादतेन च बहुप्रयोगानु-
ष्ठायिनः प्रत्युक्ताः कर्तेन शिष्टापि निवाख्याति कथमपमर्थो विज्ञायते। यस्मात्त्व पूर्वाणि क्रियंते। तस्य प्रति-
कर्मप्रतिप्रयोगं वतद्भेदादुपघ्नेत फलनानात्वं वैचित्र्यं। किंच। अंगमध्येपि कर्तृत्वं भवेद्वेदुपकारकः। प्रसं-
गसिद्धेनैगानाम प्राप्तिर्विकृतौ भवेत्। प्रयाजादीनामपि दक्षिणाकल्पात्वरूपमात्रे नित्या। भावे भवेत्यदेक-
त्वेव प्रधानोपकारः कर्तव्य इति सोपि वा पूर्वाभावात्कर्तृत्वमनेवोपकारकस्तत्रैव न प्रकृतौ प्रयाजास्य-
कृतास्तस्य विकृतिषु तत्कृतोपकारसद्भावात् विनापि तंत्रमध्यविधानेन तत्फलाभावात्। प्रसंगलक्ष

णामस्तीति नपुरंगान्यनुष्ठातव्यानि तत्र प्रयाजेप्रयाजे कृष्णलं जुहोतीत्यादौ निदर्शनानि नोपपद्ये
रन्। न चात्यंतकलभेदान्नैतत्प्रसज्यते। वक्ष्यत्यग्रेयोत्तरमर्थस्य विकृतत्वादिति। यदेव हि प्रत्यासन्ना
निप्रधानानि प्रतिकर्त्रात्मकं तदुपकारूपं दृश्यते। तदेव दूरस्थायामपि विकृतावित्यविशेषः। एतेन क
र्मविनाशपक्षेपि दोषाः प्रसक्तव्याः। यस्यापि कर्मविनाशादेव फलं भवतीत्यभिप्रायः। तस्यापि शुभाशु
२३ भैकानेककर्मतत्प्रयोगाविनाशानां प्रागभावप्रध्वंसाभावानां वा वस्तुत्वेनाविशेषात् फलनैदेवैचित्र्या
नुपपत्तिः। तथाहि। एकोरोगो हतो यस्य यस्य वायदृतादृशः। द्वयोर्मिलितयोर्भेदो न कश्चिदपि दृश्यते।
यदि तु प्रतिकर्मविनाशानां वैचित्र्यमिष्यते तथा सति वस्तुत्वापत्तेर्वस्तुत्वे तन्नाशावाच्यो पूर्ववस्त्वे वचि
नाशशब्देनाभिधीयते न वकर्मविनाशेभ्यः स्वर्गादि श्रूयते फलैर्विपर्ययायाच्चैते न्यायात्तेयागस्यत
दूर्वतः। यजेत स्वर्गकाम इति हि श्रूयते न यागाभावं प्रतिपद्येत ते ति। यस्तत्र तत्र भावांशसाध्यसाधन
संबंधनिष्ठवाक्येऽभावांशसाध्यसाधनसंबंधनिष्ठवाक्यं कल्पयति। तेन वेदस्तावदप्रमाणीकृतः। कुमा २३

कर्मविनाशप्रभवं हि सदेतन्न कथंचित्कर्मसंबंधीति शक्यं वदितुं। अत्यंतविपरीतत्वात्। न ह्यग्न्यातपप्र
भवो दाहः शैत्यसंबंधीत्युच्यते। अथवा। यथैव यागाच्छ्रुतं तत्तदभावात्कल्प्यते। तथैव स्वर्गे श्रुते तदभावः फलमि
त्यपि कल्प्येत। अश्रुतत्वेपदैः पितुल्यमिति चेत्। नात्तस्य कर्मफलस्याकृत्यात्मकत्वेनात्यंतानिंदादितुल्यत्वं हेत्वत्तु
नस्त्वात्। अपूर्वेण वा क्रियमाणेनापि नैव क्रियते। अपूर्वे वा कृते फलमेव कृतं भवतीति। न च लोके पि कश्चिद्दा
वः कारणत्वेन दृष्टो यदि तु कश्चिदुदाह्रियते। शक्तो तत्र नाडीतरं दर्शयितुं। न च तत्राश्वो दृष्टे तादृक्किंचिद
स्ति। यथापूर्वस्यापि नैवं कारणत्वं दृष्टमिति। तदयुक्तं। सर्वत्र शक्तिमात्रोपलंभात्। तद्विशेषमात्रत्वाच्चा
त्कस्याग्नेः प्रयोगः तत्र मंडूके नाग्निं विकर्षणाम्नानात्। अद्भ्रसूक्त राजसूये तत्र चोद्देर्दीव्यतीति विधाना
त। मूषिकासूक्तस्यैकादशिन्यां। आखुस्तेपशुरित्युपशाय संबंधसंकीर्तनेन मतितद्वारेणोपञ्चायस्यैव
स्तुतिः कुखुमकस्नकादीनां तु पद्विक्षुविद्विशेषरूपेणापर्योनास्ति। ततः सामान्यविधानेनार्थवत्तान्
विष्यति। वावक्ता मे सर्वमंत्रोपदेशात्। तथाग्निनेसूर्यादयावधिसमाम्नासे नवेस सर्वासीमृ वामुपदेश्या
वा। तत्रवचनेनैवासमवेतार्थमंत्रविधानसामर्थ्यादगतेरदृष्टार्थत्वा। अयणोनवक्कविद्दृष्टार्थ

त्वेन सर्वत्रैव दृश्यमानमप्यर्थं प्रोक्ष्या दृष्टार्थत्वकल्पना युज्यते। तथा हि। न जपादावदृष्टार्थे विस्म
व्यादिनिदर्शनात्। पाठ्यादावपि दृष्टार्थस्याददृष्टार्थकल्पना।। ।।अपि वा श्रुतिसंयोगात्प्रकर
णे स्तोत्रेति शंसती क्रियोत्पत्तिं विदधाते।। ।।यदुक्तं।।मनोतायामश्विवाग्निशब्दे द्रुशब्दः समासार्थत्व
-द्दापिष्यतीति। तदयुक्तं। कुतः। एतस्मादेव दोषात्। न हि द्रुशब्दस्य स्वार्थमभिदधतः कश्चिद्विरोधः
येन श्रुतिवृत्तिं जह्यात्। सर्वादृष्टार्थानीव यथा कथं चित्स्वदानापादृष्टार्थत्वापादनं संभवादप्युक्तमे
४७ तत्। यत्तूक्तं उत्कृष्यतामेवेति। तदयुक्तं। कुतः। प्रकृतस्तोत्रशेषत्वस्तुत्यासंनिधिश्रुत्या। विना सा
मान्यसंबंधाल्लिंगं वा विनियोजकीयदि स्यात्। तेन प्रथमं दृष्टार्थत्वमवधारितं स्यात्। ततः क्रमसं
निधिकल्प्या श्रुतिर्बाध्येत। यतस्तु विनियोगोत्तरकालापूर्वोत्तनकल्पना। न तद्दर्शनेव विनियोग
तेन क्रमसंनिधिभ्यां विनियुक्ते दृष्टमदृष्टं वा प्रयोतनं कल्प्यमानं न विनुध्यात् तेन वोत्कृष्टस्यप्रग
थ्यस्यान्यत्र विनियोगहेतुरस्ति। लिंगं हि देवतां प्रकाशयदनुसामर्थ्यं तन्मंत्रं तत्स्वरूपे विनिधुं ४७

जीत्।तथा वाख्यानर्थक्यप्रसंगः।कर्मसंबंधो तु न कश्चिदस्य व्यापारश्च तदेतल्लिंगादिसामान्यतः केन
त्तिकर्मसंबंधः क्रियते ततः कथं तस्योपकरिष्यतीत्यपेक्षिते पथा ३ ज्ञाकोतीत्येवमा। अथणोदेवताप्रकाश
नद्वारेणेति तिनियुक्तेन वा त्रसामान्यसंबंधकारणं प्रपश्यामः तस्मादुत्कृष्टानामानर्थक्यमेव स्यादित्य
दृष्टार्थतैवन्याप्या।किंवा एवंच सप्तमीषष्ठीद्वितीयास्तो निशंसती। स्तुतिष्ठ त्वानविष्यैतित्वत्यदेव्यार्थद्
त्तयः।गुणगुणप्य।भिधानक्रियाणामदाराद्ध्वानु सप्तमीश्रुतिसंयोगो यदत्तो।प्रकाशनेतु करणत्वात्तृ
तीयायुक्ताः कवस्मादयः श्रुपरशनतुल्स्तावपिकवतानां करणत्वात्तृतीयैव प्राप्नोति। नैषदोषः। आ
धारत्वमपि ह्यासां करणत्वेव विद्यते। तत्रैतपायेयथानीष्टं निर्देश उपपद्यते। प्रकाशने पुनः परमार्थत
स्तावदात्माधारकमेत्वप्रतिपन्नत्तरकालं वव्याप्यत्वाद्देवताधारं तत्र कवतीनामेकांतिकमेव करण
त्वमिति वैषम्यं। अपि वा स्तोति त्तरकाशंसतीति स्तुतिभावनापूर्वापरीभूता श्रूयते। तस्यां धात्वर्थः क
रणभूतः शेषाणि वकारकाणि नित्यं धात्वर्थनिष्पादयंतिसंबंधात्। तेत्तत्रयदि मंत्रास्तावनिष्टस्यथा नवे

तिततोपस्थितार्थकरणा क्षा सुदृष्टमर्थं कुर्वतो दृष्टार्था भवंति। प्रकाशनं तु कुर्वन्तो ऽदृष्टो दितकरणे ऽदृ
दृष्टार्था भवेयुः ततश्च वरं स्तुती नाम स्वादृष्टार्थत्वं। किंचा श्रुत्यैव षष्ठी पारार्थ्यं देवतानां ब्रवीतिनः। न प्रधा
नं गुणाश्च विशेष्यास्तु ते स्तेन प्रधानता। देवताप्राधान्ये हि प्रातिपदिकार्थपरत्वाद्व्यतिरिक्तार्थे विषयाभ्नि
सृष्टेति वस्त्रपथमेव स्तुयेते। पदपि किं विस्पष्टमोऽतं तदपि योग्यतापूर्वकैकवाक्यत्ववशेन गुणसंबंधार्थमे
व। यथैन्द्रोपाता ऽङ्गं गमस्यावासि तस्य स्थावरस्य वरोऽतेति। न च गुणानामुपयोगे तस्मीत्ति तत्प्राधान्यानाश्रयणे
४८ स्तुत्यर्थैतैव पुरुक्तासत्यमिति ग्रंथच्छेदः। तत्रार्थवादन्यायेन शेषपदानर्थक्यप्रसंगात्सत्यपि पूर्वत्र प्राधा
न्यापर्यवसानसंभवे स्तुत्यर्थेनैवेवं स्तोतिशंसत्योः प्रकाशलक्षणार्थता भविष्यतीति इत्युक्तं। तिप्राधान्यं
शब्दपृथक्त्वाद्वा पृथक्त्वनिवेशिनी हि द्वादशसंख्या न प्रकाशनाभेदे सतिशब्देनोच्यते। सामान्या वि
वक्षायां प्रत्येकं प्रतिपदं वत निर्दिष्टेनेन द्वादशत्वेवतिष्ठेत। ननु वस्तुतावपि तुल्यमेतत्। तथा हि। सामा
न्यस्तुतिरेकैव भेदोपि प्रस्तवे स्थितः। न वान्यथा विवक्षास्ति यतो द्वादशता भवेत्। अथ स्तोमकशाद् ४८

कृत्स्नसमुदायसाध्याः स्तुतयो गम्यंते। तथात्र प्रकाशनान्यपीत्यविशेषः। उच्यते। क्रियाः फलापवर्गिण्यः
तत्संख्यागणनाः सदा। अपूर्वं द्वादशत्वाद्द्वादशत्वेन निरूप्यते। प्रकाशनार्थत्वे हि प्रत्यक्षं प्रतिपदं वक्त
निर्वृत्तिदर्शनात्। क्रियासमवेतेन किंचिदकारणमास्थितो येन द्वादशत्वं परिच्छिद्येत। अपूर्वार्थत्वे तु तेषां शास्त्र
गम्यत्वाद्यथा कृत्स्नासमसंपदः प्राङ्निर्वृत्तिप्रमाणमनावानंतकृत्स्नसमुदायेनापूर्वनिर्वृत्तेः॥ तद्द्वारेण क्रिया
समाप्त्युपलक्षणादपूर्वाणां द्वादशत्वेन स्तुतिद्वादशत्वसिद्धिः। न हि प्रत्यक्षं सर्वेषां तेन्यो वा तत्कल्पनायां
किंचित्प्रमाणमस्ति। यथा प्रकाशनस्याद्दर्शमंत्रार्थकं वत्तद्वचनं॥ ॥शुक्रवामहूस्तत्वादाग्नेययप्रह्वोद
नैवाग्रेयीनां स्तुतिसामानत्वसिद्धेः। आग्नेयी पु स्तुवत इत्यानर्थक्यं वचनं। अन्यस्यार्थः प्रतीयते॥ संबंधस्य च
भेदनिबंधनत्वात्संबंधवचनेन स्तोत्रशस्त्रयोर्भेदः स्वप्रकाशनेकत्वात्र प्राप्नोति। ननु स्तुत्यैकत्वादिति
स्त्रापि तुल्यमेतत्। अप्रगीतप्रगीतमंत्रसाधनत्वेन त्वेदः। तच्छक्तिद्वारेण वा सप्रवेयदेषा विशिष्टः त
त्रान्तरं द्वादशत्ववदत्यैत भेदाद्धि स्तोत्रशस्त्रयोः पूर्वयोस्तद्द्वारेण क्रिययोर्भेदमुपपर्यसंबंधवचनं। ननु प्रका

शानेस्वतः फलतेवाभिधीयते॥ अभिधानेवकर्मेवतयदिदंद्वितीयाप्रतियादितकर्मादिहेमभिधाने इदंवाय
रेप्राधान्यकारणं। प्रधानक्रियादिकेनविडूपेणोस्मिता॥ अग्निदात्रेतुहोतायाघारमायारपतीतिवद्भवति
नमस्कारक्रियायाःयेतगुणभूतत्वात्। अथवास्तोत्रशस्त्रसमाख्ययोरभिधानत्वात्प्राधान्यज्ञापनार्थं
इतरथाहिप्रकाशनमित्येवसमाख्यास्यात्। अवहंत्यादिवद्धानेवभवेत्। फलनिर्वृत्तिरेष्ठा॥ योयंमंत्रेफ
लाशीरर्थवादःसस्तुतःप्रधानत्वेद्यरते। सर्वत्रप्रधीनविषयत्वात्प्रार्थनानां। त्वत्प्रहेतुदेवतैवप्रधा
४५ नत्वात्फलेपाद्येतकर्मेवत्। नस्वामिनिस्थितेकश्चिद्गृहात्प्रार्थयितापफलं॥ ॥विधिमंत्रयोरेकार्थ्य
मेकशब्द्यात्॥ इहमंत्राउदाहरणं। कितद्रुतामावनावनोद्धाहरणावद्विदधतिनेतिसंदेहेत्राह्वानेद
दि।धायकाइत्याशंक्यमंत्रत्वात्प्रार्थत्वाद्वाविधित्वासंभवेनप्रयोगकालेषुब्राह्मणाविहिताः नामेवा
र्थानांस्मीरकाइत्युत्तरपक्षेउक्तः। तथाहि। नकर्मातरताम्यत्रवलक्ष्यप्रत्यभिज्ञया॥ नवोपात्तागुणः क
श्चिन्नववाक्यांतरस्तुतिः॥ स्मारकत्वप्रतिपक्षौहिविध्यर्थवादौस्यातां। तदिहस्वरूपंतावदन्यतत्रि ४५

यायाःप्राप्तेःगुणफलनिमित्तानितुनैवायात्तानियानिविधीयेरन्।नचवाक्यांतरस्थैःपर्यवसितप्रयोजने
विधौस्तुतिरुपपद्यते।त्वदुक्तेप्रधानमंत्रे।तस्मात्प्रकाशकामंत्राइति।यद्यारव्यापतेत्तत्रवदामः॥किंपुनः
कारणंमंत्रत्वेनाख्यानविशेषणेविधिशक्तिस्तिरोधीयते।कथंवाब्राह्मणत्वेनासावाविर्भवति।इष्टाश्वमे
ध्रगताविधायकावसंतायकपिंजलानालभेतेत्यादयस्तथाब्राह्मणगताअप्यविधायकायस्मान्नये
हविरार्तिमार्छेदित्यादयस्तस्मान्नायमेकान्तः॥किंवाप्राप्तत्वाद्यदिवेष्यतेमंत्राणामनुवादत्वं।तैरेववि
हितंकस्मान्नस्मारयतिचोदना।नह्यत्रविशेषहेतुरस्तिकिंब्राह्मणविहितमासाद्योपहृतविधिशक्तिमं
त्रःस्मारकोमंत्रवत्यथवाविपर्ययइति।तत्रानयोरनुवादत्वेमंत्रवादगृह्यमाणविशेषत्वाद्द्वयोरपिवि
धायकत्वं।अस्यामावकर्मभेदःस्यात्।तत्त्वहस्त्वादिवन्मंत्राःकरणत्वेनकर्मणो।ब्राह्मणेननियुज्यंतेतेत
द्वत्तेनविधायकाः।तैरपिसामान्यतोहमात्रंव्यपदिष्टं॥कुतः॥विधिशक्तिर्नियोगेनतन्मंत्रस्यापनीयते
ह्यते।विधास्यतिह्ययनियोगात्स्मारयिष्यति।नहिविनियुक्तेननविधातव्यमितिकिंविद्यमाणेयदि

स्वतो विधिशक्तिरस्त्येतेषां ॥ अथ त्वसौ प्रथममेव नास्तिव्यर्थो विनियोगोपन्यासः । न वा नप्रकरणे विरो
ध४ तथा हि विधायकं सदप्यर्थं ब्राह्मणं स्मारयिष्यति ॥ मंत्रं तस्तु विरोधे स्यादित्यत्रैतद्वक्ष्यते । यदेवत्व
नेनाविनियुक्तास्ते वक्तव्यं तन्निराकरणे हेत्वन्तराभावात् विधायकाः प्राप्नुवंतीत्येतदप्यकारणं । न वाऽत्र
मंत्रोपन्यासस्य कश्चित् संबंध इत्यन्यथा वर्ण्यते । द्विविधमेवाख्यातं गुणप्रधानकर्मत्वेनोक्तं । अथेदा
नीं प्रस्तूयते । किं तावेव द्वौ प्रकारावुतान्योप्यस्तीति । तत्र न तृतीयः प्रकारोस्तीति मत्वा पूर्वपक्षवादी व
५० दत्येकार्थ्यमिति । तथा प्राप्ते । निधीयते । अपि वा प्रयोगसामर्थ्यात् मंत्रोभिधानवाची स्यात् । अस्ति तृती
यः प्रकारस्तद्यदभिधायकत्वं नाम प्रकृत्य । येषामाख्यातानां येषां शब्दानां रूपेणाविधिशक्तिरपगच्छति तेषा
मभिधायकत्वं । तत्र नन्ताननुशंतीत्यत्र तावद्यच्छब्दोपहतो विधायकोनुवादत्वे प्रार्थयते । तथा ॥ अत्र खलु
धियमंत्रं मेगोपायेत्यामंत्रणविभक्त्यादयः मिरुक्ता मीत्युत्तमपुरुषेणापदिसामयद्दरेपुरिति पदि
शब्देनत्वेवमादयश्च प्रायेण मंत्रेषु स्थिति मंत्रा उदाहरणं अविधायका मंत्रा इति वक्तव्यसिद्धिः ॥ वाक्य ५०

णोतु स्वरूपं सा विधायकत्वं तेन तद्विधायकमिति प्रसिद्धं। अथैतत्त्व विधायकत्व इतित दिह नोदाहृतं। विधायकत्वा
विधायकत्वेतु तत्पर्यायोक्तमेव कारणमिति न मंत्रब्राह्मणत्वपर्यायपर्यायः। तत्र लेतावान्विशेषो दृश्यते। नृ
पादेव ब्राह्मणगतानां विधित्वनिवृत्तौ सत्यां निमित्तादि प्रत्यायनार्थतानस्ति तेषां तु रूपे कर्मसमुच्चयोगा। इ
मंत्रगतानां तु स्वरूपमेवोपलभ्यते। यदा मिरहन्मामिनिर्वपामीदमिदं करोमि॥ अग्नीदग्नीन्विहर बर्हि स्तृणी
हि इदमिदं कुर्वित्यादिकं वा क्वमेतैः कर्म्म स्मर्तुमिति विनियोगबुद्धिर्भवति। कुतः। अतुष्ठेनेयदार्थानो
मत स्वरूपं भाविनी स्मृतिः। अनन्यसाधनानन्यकार्यमीत्रैः प्रमाप्यते। न तावदनुष्ठानवेलापामस्मृतः क
स्विदपि पदार्थः शक्यः कर्तुमित्यवश्यं भाविन्या स्मृत्या योग्यसाधनमात्रापेक्षणाख्य हि विद्वास्सणप
दार्थानुसंधानं वा पूर्वपदार्थप्रत्यवेक्षणं वा सूत्रग्रंथो वात्मीयग्रहणाद्वा वाक्यानि वा उपद्रष्टा वा साध
ने गृहीतुमारभ्यते। तत्रानन्यप्रयोजनानां त्वात्पकरणपत्यमातात्मोमान्येन किमयोग्निः कर्त्तव्यमित्येवं
प्रयोगवचनेन गृह्यमाणानुपलभ्यमानाद्दृश्येन वाक्येन स्मृतिः कर्त्तुमाकांक्ष्यते। तद्रूपाएतइति विदि

त्वा लिंगप्रकरणानुमितया श्रुत्या विनियोगे सत्यभिधानार्थता विज्ञायते ततश्चोयायायेत्तराएप्रमाणोक
त्वात्रिवर्त्तेते नियमाहृष्टसिद्धिश्च मंत्रैरेव स्मृत्वा कृतं कर्माभ्युदयकारि भवतीत्यवधार्यते। भाष्यमप्य
वयोजनीयं। नाशक्नुदप्युच्चारणात्तत्प्रत्ययादिति न प्राप्तत्वाभिप्रायेणोक्तेन। किंतर्हियच्छुदोपवंधाद
स्यैवमंत्रा स्यात् तस्मान्नातः प्राप्तमर्थमहं ब्रवीमीत्येवंरूपप्रत्ययात्। गातकृत्वापिह्येवमादिन्तुच्चार्यमा
णः स्वसामर्थ्येनैव पूर्वप्रत्ययं करोति। तत एव पूर्वप्राप्तबुद्ध्युत्पादात्॥ तच्चोदकेषु मंत्राख्या। यथो
५९ क्तेन न्यायेन मंत्रोदाहरणमप्यातं चैत्वात्प्रासंगिकमेवेदं पूर्वसूत्रप्रयुक्तमंत्रशब्दार्थलक्षणाभिधा
नमितिनावरूपमिदमर्थतोऽकरणोपूर्वशाक्यं हि वाक्यमात्रेमप्युदाहृत्य विधानपितुं। भाष्यकारस्तु सू
त्रकाराद्यारितमेवशाद्वादरेणापौर्वापर्यविशेषमाश्रात तच्चोदकेष्विति। तदभिधानं चोदकं प्रयोज
कंपाषामिति बहुव्रीहिः। अर्थप्रदर्शनमात्रार्थं तु षष्ठीकथनं भाष्ये। अथ्येलृच्चद्रव्यव्यवहारसिद्धं ते
देप्रापि कविद्वपुक्तेलक्षणानां लाघवार्थमुक्ते। धरतोगतानेकद्रव्यप्रत्येकनिर्देशापुनः पुनः ष्वष्टे ५९

कुटिलीक्रियत इति। तस्मात्सामान्येन पृष्टः कोऽभिधानांशोऽवस्थैवं द्रष्टव्यः॥ अथ षष्ठ्योपि पिहितस्याशांनां ते
याति पृथक्करणः॥ लक्षणेन तु सिद्धानामंते यांति विपश्चितः॥ वृत्तौ लक्षणमेतेषामस्यैतत्वान्नरूपता॥ या
शिष्टः स्तुतिमेस्येव प्रलक्ष्यं परिदेवितं। प्रैषो वैषणा पृष्टाख्याऽनुषंगप्रयोगिता॥ सामर्थ्यविति मंत्रा
णां विस्तरः प्रापिको मतः। इंदुलेरिवति दुलिः कश्यपः प्रतिपुनातु शब्दमच्छिद्रेणेत्यनुषंगः॥ सामर्थ्यमभि
धानशक्तिः। यमो दुग्धवेतस्म एव निराकृतवंत इति प्रैषः॥ परिदेवितं। अमुतः सोममाहरेति सोपर्णो
पाख्याने विनतया गंतुमानमृतार्थं प्रेषितः॥ करणावती भूमिः स्थूणा। शेषे वा[illegible] लक्षणाशब्दः परिशेषसि
द्धत्वात् वाक्यस्य लक्षणमवचनीयमिति सूत्रमनारभ्यमिति प्रतिभाति। तत्र शेषशब्दप्रयोगाल्लक्ष
णानभिधानाद्वसूत्रस्याख्यानमेवेति द्रष्टव्यं। किमर्थं पुनः सूत्रमारभ्यते नानूच्यते वपादिमंत्रवाक्या
त्मक एव वेद इति प्रसिद्धमेवेतत्। येषां त्वेतदप्रसिद्धं। तेषां द्वितीयादिप्रकारनिराकरणार्थं द्वेराश्यमे
व वेदस्येति प्रतिपादयितुमारभ्य शेषे वाक्यलक्षणाग्रह इति। एकपुरुषकर्तृकमुपाख्याने परकृतिः।

चकुकर्त्तृकं पुनः कल्प्यः। एतत्रान्यथार्थप्रतिमाते पौर्वापर्यालोचनेन व्यवस्थार्थोऽन्यथा कल्प्यते। सा च
व्यवधारणाकल्पना। तद्यथा प्रतिगृह्णीयादिति श्रुते प्रतिग्राहयेदिति कल्पयिष्यते। विधिलक्षणामित्य
त्र ब्राह्मणवाचो विधिशब्दः॥ ॥ अनाम्नातेष्वमंत्रत्वमाम्नातेषु हि विभागः स्यात्॥ सूर्याय त्वा जुष्टं नि
र्वपामीत्यूहः॥ तथा पत्नयजमानस्यार्षेयं नोच्यते। स प्रवरस्य यजमानतत्पुत्रादीनां ना
५२ मग्रहणं तन्नामधेयेप यथा सुब्रह्मण्यायां देवदत्तो यजत इत्यादि। तेषामपि तद्वोदके क्लिप्ते तस्मात्त
रणान्मंत्रमध्यपातात्त्वमंत्रत्वप्राप्नुवंति। स्वाध्यायेऽध्ययमानेषु येषु मंत्रपदं श्रुतं। तेमंत्रानामिधा
नेऽस्मिन्मंत्राणीलक्षणे स्थितं॥ किं पुनरेकस्मिन्नपि पदः कृत्यमाने समस्तस्यैव मंत्रत्वं। उत हि तप
दमात्रस्यैवेति समस्तस्यैवेति प्राप्ते। कुतः स्वरवर्णानुपूर्व्यादि विशिष्टं हि प्रयुज्यते। मंत्रग्रहस्त(
तोऽन्यत्वेन तस्यार्थः प्रतीयते। संप्रदायकालाद्वगतत्रूपान्यत्वे वेदेन विदुष्यः शेनजातं न शक्यते
मंत्रत्वेन प्रत्यभिज्ञातुं। अथैकदेशोऽपि तस्मिन्नवानुपगमः। ततः सर्वत्रैव वर्णपदादिविशेषान्मंत्रत्वप्रसं ५२

गः।तस्मादेकवर्णापायेपिमंत्रत्वासंभवात्समस्ततद्गतकार्यनिवृत्तिः।अतश्चयथैवतद्धितशेषसर्वा
वयववर्त्तिमंत्रप्रायश्चित्ताभावः।एवंमंत्रच्छेदोविषयत्वेनयावंतःशब्दाःस्मर्यंते।तैर्नभवितव्यमिति
कपक्षस्तदवयवोहेनत्वयंत्रगतसर्वच्छांदसोपोद्धारेणालौकिकशब्दप्रयोगःकर्त्तव्यइति।अत्रब्रूमः।ता
वन्मात्रमेवामंत्रइति।कुतः।आकृतीनामभिव्यक्तिर्याकथंचिन्निरूपिता।।तासांचवैयर्थ्यवाधिक्येविनश्ये
षुविनश्यति।नहिगोर्गडुनिलाते विषाणेवालांगूलेगोत्वंतिरोधीयते।तदभिव्यक्तिसमर्थावयवांतरसद्भा
वात्।कियत्यपिहिसंस्थानेछिद्यमानेसर्वाकृतयोविज्ञायंते।साचेयंमंत्राकृतिर्विशिष्टस्वरवर्णानुपू
र्व्याद्यभिव्यक्तानाकिंचिद्विकारदर्शनेननश्यतीतिप्रत्यक्षमुपलभामहे।तथाहि।यत्रवर्णोविकारो
वावर्णांतरोपोपिवाश्रुतः।४।हरीतरन्नियोगोवानमंत्रत्वंनश्यति।पत्नवचनाद्वर्णलोपंविकारंवाकृत्वा
प्रयोगः।एवंकृत्वोऽध्येयमित्यादौयत्रवस्त्राध्यापकालदृष्टत्रेमूर्पादिपरित्यागेनैकश्रुत्येनियुज्यते।नत
त्रैकस्यचिन्मंत्रबुद्धिरपैति।स्यादेतत्।वचनसामर्थ्यादिहनापैतीति।तदयुक्तं।वचनेनहिप्रयोक्तृत्व

मेतदुच्यते। न मंत्रत्वेन तन्निरूप्यते। तेन हि ऊहवचनविनियुक्तानां व्रीह्यादीनां मंत्रत्वं भवति। अतश्चैव मंत्राणा
मेव सतां वचनाद्विनियोग इत्यापद्यते। न चार्हति भवितुममंत्रत्वं। मंत्रत्वप्रत्यभिज्ञानात्। अतश्चात्र क
मभिरायेदादीनामेवामंत्रत्वं भवतु। न सकलस्य वाक्यस्य। न वा तेषामपि भवति समस्तवेदालोचनेन
मंत्रत्वनिरूपणात्। इह गिरापदवान् मंत्र इह इरापदवान् इह वैश्वरूप्यवान् इहैकश्रुतिमानिति इत्यादिनाए
५३ वावधार्यते यद्येवमूहादीनामपि मंत्रत्वप्रसंगः। तत्रापि हि प्रकृतिविकृत्यालोचनेन शक्यमेवं निरू
पयितुं। इहाग्निपदवान् निर्वापमंत्र इह सूर्यपदवानिति। नैतत्समानं। कुतः। यत्र वैदिकमन्त्रत्वं तत्र
मंत्रत्वमिष्यते। व्याप्येन कल्प्यमाने तु न शक्यं तन्निरूपणं। वैदिकं ह्यालोच्यैवमवधारणं भवति।
इहेदृशो मंत्र इह ईदृश इति। सूर्यादिपदप्रयोगस्तु कार्यवशेन न्यायेन कल्प्यते। न च मंत्रत्वं [illegible]
म्यामिति विस्रंभः। ननु यातिदेशोपि वेदप्रकार एवेति सर्वमूहादिकं वैदिकं। इतरथा ह्यप्रमाणमेव
स्यात्। न ह्यंगांगिभावः प्रत्यक्षानुमानादिगम्यः। तस्मात्सूर्येरापदयोरविशेष इति। अत्रोच्यते। ५३

सत्यमूरुस्यापि तावैदिकत्वेमत एवानाम्नातेष्वमंत्रत्वमित्युच्यते। वेदभागो हि कश्चित्स्वरूपतः श्रूयते कश्चिदनु
मानादिगम्यः प्रत्यक्षश्रुतत्वाद्वाम्नात इत्युच्यते। तत्र पर्येरापदादीनां विनियोगः श्रूयते। नैवं सूर्यपादादीनां।
ननु सोऽप्येवमनुमितेत्यतद्वदक्षश्रुतिसमवायित्वाद्देवतायाः सूर्यपदस्य विनियोगस्तर्कः श्रूयते। नैतन्मंत्रे सूर्यपद
प्रक्षेपं ब्रवीति। हविःप्रक्षेपकालेऽमात्रे तदुच्चारणाभिधानात्। यस्तु मंत्रेषु तत्प्रक्षेपः सोऽतिदेशकृतो न वि
ध्याति। नवातिदेशवचनं न्यापत्त्यन्यत्वादेवाम्नायते। तस्मादनाम्नातविनियोजकत्वादमंत्रत्वं सूर्यप
दादीनां। नन्वेवं सति प्रवरनामधेययोः प्रत्यक्षोपदेशात् मंत्रत्वप्रसंगः। स्यादेवं यदि स्वरूपमाम्नाये
तवचनार्थमनुज्ञात्वात्स्वनाम्नातयोरेव प्रवरनाम्नोः प्रयोगात्र मंत्रत्वनिरूपणायामंतर्गतिः। एवं तर्हि
पत्रापि सर्वनामयुक्तमंत्राम्नाने सति तत्स्थानेऽन्यपदप्रक्षेपः क्रियते। तत्राप्यमंत्रता स्यात्। तथा नाम
ति केचित्। अथवा विशेषणानामानंत्यादपुगयकोलत्वादाम्नातुमशक्तेश्च स्वरूपस्य सर्वनामप्रकारे
णाम्नानमस्त्येवेत्यशून्यस्थानत्वान्मंत्रस्य तत्राकर्मवं निरूपणं कर्तुं पदद्वयपदं निवेश्यते। तद्धानये मंत्रइ

ति। इतरथा हि सर्वेनाम्ना मन्त्रप्रयोगाद्धत्वा यदि विशेषाम्नानमेवैतत्तेनोपाप्येनोति न गृह्येत। तत तस्तद्देश
न्यूनत्वान्मंत्रस्वरूपस्याप्यर्थमेव सर्वेनामाम्नाने स्यात्। प्रवरनामधेयवदेवविधानात्तदेवकोशस्थपद
प्रयोगः कल्प्येत। तस्मादेवमादीन्याम्नातान्येवेति मंत्रधर्मैः सेवध्येरत्। न तु प्रवरादीनि मंत्रपाठकालेऽक
स्त्रिदपि संस्पर्शी। न वर्त्राह्मणेन रूपं दर्शितं। येन प्रवचनलक्षणत्वान्मंत्रत्वं वाध्यावसाने नवेत्। प्रतः स्व
विकृतिष्वभिधानार्थवोदकाभ्यां सकलेमंत्रे प्रापिते यावन्मात्रमर्थो नावाद्धावस्थान्यत्र प्रक्षिप्यते। ताव
५४ न्मात्रमेवलोकिके। अव शिष्टं तु तथा प्राप्तमेव कैश्चाकांक्षितं प्रत्यभिज्ञायमानं मंत्रत्वेवेति न प्रायश्चि
त्तैकादसप्रयोगैर्वर्जनीयमिति सिद्धं। ऋचां तेषामृग्गायत्रार्थवशेन पादव्यवस्था। प्रसक्तानुप्रसक्त्यायति
तमृगादिलक्षणाभिधाने शब्दार्थस्यैव द्वयव्यवहारगम्यत्वात्कृतेपि तल्लक्षणोत्क्रमूलमभियुक्तोपदेश
मेव दर्शयति क्रियापदानुपादानादप्रिः पूर्वमिति पर्यवसितेर्थेकिञ्चित्तत्वशेनपादव्यवस्थानतुवा
ग्निमीळइत्यपि समस्तायां तदाः एकार्थत्वान्नैवप्रतिपादमर्थः पर्यवस्यतीति न वाक्यमर्थवशेन पाद 54

व्यवस्थेति। कथं न वाक्ये अग्निमीळे पुरोहितमिति तावत्प्रत्यङ्गं समाप्तोऽर्थो दृश्यते। परयोः पादयोरसमाप्त इ
ति चेत्। न आख्यातानुषङ्गेण समाप्तेः सिद्धत्वात्। तस्मात्साधूक्तमिहार्थवशेनेति। एतस्य तु प्रदेशेनार्थत्वा
न्नेदं तु वशया इत्युत्तिरित्यनिसिद्धमुक्तं॥ ॥गीतिषु सामाख्या॥ तेषामित्यनुवर्त्तते। अत्रापि स एवाभियु
क्तोपदेशोपन्यासः। प्राग्यथा यथाम्रं दधीति पूर्वत्रैव वाक्यं सदनादना दिहोदाहृतं। अथवा। यथानेक
धर्मसमाहारे नेमतिदन्तिगुडयोरसविशेषमात्रमन्नमधुरशब्दे वुपाददीते। तथा सामशब्देपीति मन्त्रमित्य
त्रोदाहरणं। ननु च प्रत्यक्षगम्यत्वादस्य विशेषस्य नाभियुक्तोपदेशोनुवादत्वान्नैव प्रमाणं। नैष दोषः।
प्रत्यक्षमत्रेति करणावच्छिन्नेन निर्देशेन। एतदुक्तं भवति। यथाम्रं दधि मधुरो गुड इत्येतच्छिष्टज्ञाने प्रमाण
मेवमभियुक्तोपदेश इति गीतिर्विशेषणत्वात्पूर्ववत्तरप्रायेने सत्याकृतिवदभिधेयत्वे निर्णीतयोरा
द्व। एकरूपेऽतः शब्देन विशिष्टोपत्रगम्यते। विशेषणस्य वाच्यत्वं तत्र सर्वत्र ज्ञायते। शेषे यजुःशब्द॥
शेषे ब्राह्मणशब्दवत्समस्तवाक्यं बोध्यं॥ ॥निगदो वा चतुर्थं स्याद्धर्मविशेषात्॥ शेषे यजुःशब्द इत्येतद्व्याव

त्ते नार्थावाशब्दः स्वतुर्थमेवज्ञाते निगदः स्यात्॥ धर्मान्यत्वात्॥ यदि तावदुद्वैर्निगदेनेति विधिः ततोऽय
जुर्धर्मतावा मा भूदित्यर्थान्तरत्वो ऽयानुवादः सनैवप्राप्नोति त्वनिरेकेण विनेति भेदः॥ व्यपदेशाच्च॥ व्यप
देशाच्च भेदः। यजुर्षु विवादद्रूपत्वात्॥ अहेतुश्चियमेवं मेगोयायेति त्रिष्वेव मंत्रलक्षणोपसंहारात्। वेदेव
मंत्रसमाम्नानाधिकरणे न निगदशब्दप्रयोगाद्यजुष्ट्वापरित्यागेनैव वधमे विशेषव्यपदेशभेदसिद्धेः॥ परि
५५ शेषसिद्धयजुर्लक्षणायोगाच्च यजुष्ट्वेव निगदाः॥ वचनाद्धर्म्मविशेषः। न्यायप्राप्तेर्वै धर्मानुवादत्वज्ञा
५५ नात्र विधानादिति व्याख्याते। यंत्वेते ऽर्थवदं तितमुपीशुत्वे नशक्नुपूर्वत्कुमिति वचनादित्युच्यते॥ अ
र्थाच्च॥ अग्निर्वागीदग्नीधिहरेत्या दिवचनेनार्थान्यथानुष्ठानानुपपत्तेः इति धर्म्मविशेषप्राप्तिः। त
थाच निगदशब्दावयववृत्या त्रिसिद्धिः॥ वाचनिकमप्युपांशुत्वमनुपकारकत्वेनानंगत्वान्निगद
व्यतिरिक्तयजुर्विषयं ज्ञापते॥ गुणार्थो व्यपदेशः॥ ब्राह्मणपरिव्राजकवद्गुणेन व्यपदेशभेदः। सर्वे
षामिति वत्॥ अतिप्रसंगाद्वारेण गुणस्य व्यपदेशनिमित्तता व्यभिचारयति॥ नैर्व्यपदेशात्॥ नतावद ५५
५५

तिप्रसंगो क्विनिगदानां। दित्वाद्वा विधानात् न हि तदेव निर्दिश्यते तस्यैव विधिरवकल्प्यते। न वाक्यभिवाखिलं
निगदतिवशेन यजुष्टुं सति धर्मविशेषस्य व्यपदेशभेदनिमित्तत्वात्॥ अथैकत्वादेकं वाक्यं साकांक्षं
वेद्विभागस्यात्॥ कविदेतत्सूत्रं वाक्यलक्षणत्वेन व्याख्यायते। तत्रापि किं लौकिकवैदिकवाक्यमेव वेदे
तु प्रसिद्धिवशेन लौकिकानामेवेतल्लक्षणं॥ कुतः॥ अन्यतो वगतेर्थे हि लोके वाक्यं प्रवर्त्तते। तत्रैकार्थ
त्वविज्ञानात्सुखबोधैकवाक्यता॥ लौकिकानां हि वाक्यानां प्रमाणांतरेणार्थस्तदेकत्वं वावधार्यते। त
त्प्रसिद्धेन हेतुना शक्यमेकवाक्यत्वमवगंतुं। वैदिकानां पुनरनन्यप्रमाणगम्यत्वात्प्राग्वाक्यात्तदेकत्व
ज्ञानादज्ञातेर्थे तदेकत्वसिद्धिर्नास्तीत्येतल्लक्षणानुपपन्नेनर्थापत्त्या विपरीतलक्षणोद्भृष्टव्यं वाक्यैक
त्वादर्थैकत्वमिति। पृथेवद्धि धर्मिणा वाक्येन धर्मान्तरमर्थः प्रतिपाद्यते। तथैव वाक्यधर्मिणैकत्वेनार्थैक
त्वं॥ आह च। नित्यं वाक्याधिगम्यत्वात् यथा वाक्यं प्रवर्त्तते। वेदार्थस्तदसिद्धेस्तु न वाक्यस्यार्थरूपता॥ अ
त्राभिधीयते। देवव्याख्यानप्रवृत्तस्य जैमिनेः कः प्रसंगो लौकिकवाक्यलक्षणाभिधाने। वैदिकवाक्य

लक्षणाभिधानेवैदिकवाक्यलक्षणस्यापिभेदलक्षणोक्तःप्रस्तावः किमर्थंप्रमाणलक्षणएवनोक्तः।ए
कत्वाच्चश्चनवक्तव्या।एकार्थत्वात्वाक्यमित्येतावतैवसिद्धत्वात्।कथंवमंत्राधिकारेतदसंबद्धोऽर्थोऽभि
धीयते।भाष्यकृतस्यप्रक्षिप्तपठितेषुयजुःष्वितुपन्यासः प्रमाणत्वानपिविनाकारणेनातिक्रांतः॥
किंच।यजुर्भिदंवमुक्तेतद्वाक्येकृत्स्नस्यलक्षणं।मंत्रब्राह्मणलोकेषुवक्तव्यंवाक्योपयुज्यते।सकास
५६ पस्तावत्यनिमार्णप्रयोगसमर्थंप्रसिद्धमितिनकश्चिद्वाक्यलक्षणादिकंवाक्यतालक्षणाद्धोपकारोभ
५८ वति।तथाब्राह्मणेऽग्निहोत्रादिवाक्यैःसाध्यसाधनेतिकर्तव्यतावत्यांभावनायांनिमुक्तेषुपुरुष
स्यैकानेकवाक्यज्ञानेकोऽर्थःशब्दात्स्यादिदोषतः।एकनानात्वविज्ञाननिरपेक्षेवधार्यते।पदत
देकदेशततसमूहात्प्रवृत्तिप्रसंगात्मकतद्विनागलक्षणेनवावाक्यैकत्वनानात्वज्ञाननिरपेक्षैरेवदोष
त्वेनावधार्यते।विनागलक्षणेगम्यमानसंबंधपरित्यागेनकाल्पष्टकल्पनावादोषः।इतरेतराच्चेरेव
दत्वादप्रामाण्यमितिनैकवाक्यलक्षणेनार्थः।योनुषंगवाक्येतुलक्षणंनिरपेक्षस्यलोकस्यव्यवहा ५६

रासिद्धेरत्यंनानौपयिकत्वं। यदि वार्थैकत्वेन वाक्यैकत्वमवधार्यते। वाक्यस्यार्थप्रत्यायनार्थत्वात्तत्त्वनू
पैकत्वज्ञानोन्तरकालभाविना किं वा कैकत्वज्ञानेन। वक्तृणां च परप्रत्यायनार्थं वाक्यप्रयोग इति न। (
त्मार्थलक्षणाज्ञानापेक्षा श्रोतॄणां पुनरस्येतानवगते ऽर्थे प्रवर्त्तमाने पुरुषवाक्यमपि न वेदवाक्या (
द्भिद्यते। अवगतार्थत्वनुवादत्वादनादृत्यमेवेति नैकनैकज्ञानमपेक्षते। किं मर्थ्यवैदिकानां लक्ष
णानाञ्च। यदि त्ववर्थापूर्व्याक्त्यमेवेति तन्न। श्रुत्यात्कलक्षणामभिधायार्थापत्त्यालौकिकवाक्यसिद्धि
राश्रयितव्या। न वार्थापत्तिः सम्भवति। न ह्यतल्लौकिकवाक्यलक्षणाज्ञानमीदृशेन्वैदिकवाक्य
लक्षणानविनानोपपद्यते। न वैतस्यापि वाक्यलक्षणाता सिद्धा वाक्यैकत्ववशेनार्थैकत्वलक्ष
णार्थापत्त्युपन्यासात्। अपि च। कैदाविद्धैदिकानाममय्येतदेव लक्षणं। अन्यैतत्विप्रकृष्टं वा किं विद्व
वेदित्याग्री किं तत्वातनविनियोगतार्थापत्तिः। न तत्परिसंख्या सामान्यविशेषभेदानुपादानात्। प
दिहि सामान्येनदैलक्षणांक्ष विदभिधाप्यपुनः केवलं पौरुषेयं संवद्धमुच्यते। ततः परिसंख्यावशे

नवेदिकानामिदं तावन्न भवतीत्येतावन्मात्रं गम्यते। न तु लक्षणविशेषो नैकोपपन्नत्वात्। एवमपि
हि विपर्ययकल्पनेऽसंभवति। अर्थैकत्वादेकं वाक्यं निराकांक्षं चेद्विभागे स्यात् इति। अथवार्थै
कत्वान्नानावाक्यमिति। तस्मादेकल्पनेयं। किंच। कथं वार्थानपेक्षत्वे वाक्यैकत्वे प्रसिद्धालि। न
५७ हि वर्णस्वरूपेणाज्ञाने नैतन्निरूप्यते। वाक्यैकत्वाद्वार्थैकत्वेवधार्यमाणे तस्य समर्थानिरपेक्षवाक्यै
५७ कत्वे प्रसिद्धालि। न हि वर्णस्वरूपे कत्वमवगतव्यतव्यं। न वुतस्यावधित्वे न किंचित्प्रयामःव
र्णाभ्रानेवर्णास्वरूपैव॥ तथाहि। अज्ञातार्थेषु वर्णेषु वक्तृवाक्यैकवर्तिषु न कदाचिन्मतिर्दृष्टा
वाक्यैकत्वावधारणे। तस्मात्पदेषु यावत्सु श्रूयमाणेषु दृश्यते। विषयस्यैकस्य समर्थ्यस्तावतामेक
वाक्यता। लोकमंत्रब्राह्मणेष्वव्यभिचारिण्येतदेकवाक्यलक्षणमिति स्थितं। पन्नु न प्राग्वाक्य
दर्थं तदेकत्वावधारणमस्तीति। अत्र ब्रूमः। पदार्थैः पदविज्ञातैर्वाक्यार्थः प्रतिपाद्यते। लोकसि
द्धेन तत्रास्ति वाक्यैकत्वनिमित्तता। यदि हि वाक्यं पदवद्वाचकं भवेत्। ततस्तदेकत्वानेकत्वानु ५७

वर्न्निता वाक्यार्थस्यार्थस्यानुपगम्येत कदाचित्। यदा तु पृथग्भूतैरेव पदैरितरेतरनिरपेक्षैः स्वेषु पद
र्थेषु तेषु तत्संसर्गादिव पदार्थापारानपेक्षो वाक्यार्थप्रत्ययो भवति। तद्दर्शनं तावेतिपदाति एकवा
क्यमित्यवधार्यते। न तदा वाक्यतदेकत्वयोर्व्यापारपश्यामः। तस्मादविरोधः। भावनैव वाक्यार्थः
स्वकारकविशेषिता॥ तस्याश्च ज्ञायते नित्यं भेदः शब्दान्तरादिभिः। यस्मिन्नादसम्भृते शब्दान्तरादिभि
र्भावनान्तरं प्रतिपाद्यते। तस्यैकवाक्यत्वं भावनीतरापेक्षया नानात्वं। तद्वैतदुन्नयमप्यान्यत्र ए
वज्ञापत इत्यनिमित्तं। वाक्यैकत्वमर्थैकत्वस्य। तस्माद्यथाभाष्यमेवं व्याख्यातव्यं। भेदलक्षणे भे
त्रप्रस्तावेवत तद्भेदस्तावाद्द्व्यन्तु। सामान्यमेको निहितस्तद्वीतरनेदाकोदायां क्रतुसामानामध्ये
त। सिद्धे भेदलक्षणे न क्रियते। यद्गुणांतु प्रश्लेषपठितत्वान्न लक्षणादि वितानेदज्ञानमस्तीत्या
रभ्यते। ननु मन्त्रप्रतीकविनियोगात् भेदः सेत्स्यतीति न तावत्सर्वेषामेव ब्राह्मणे विनियोगोऽस्ति।
नवोन्नरादिः पूर्वातलक्षणामित्येतद्धि दववनेन्यापनतुम् ऋकारेरात्मीपवाह्मणाविनियोगश्च

तदुक्तमितिन्यायस्यलक्षणमुच्यते।तत्रावापवत्युत्पत्तिबलेनाहृत्यासतेऽपतइति।सर्वमंत्राणामभ
नेनयजेतानेनयजेतेतिहिप्रथमंप्रकरणाम्नानानुमितवाक्यविनियोगोभवति।ततःसाद्गु
ण्यागसेवद्यासंभवानन्तदुपकारित्वप्रकाशनेनतेरिष्टभवतीतिकल्प्यते।तेनोच्यतेयावतापद
संघेनस्मार्यतेयागसाधने।तावद्यजुश्चवाक्यंवचनत्वल्लान्नित्रूप्यते।वचनाईहिवाक्यका
५८ कार्यसमर्थवत्तरंहृभवति।नन्यूनमधिकंवातावतैववक्त्यते तन्नुकीदृशमित्यकार्थसाकांक्ष
तपवंवेतिलक्षणांइहदर्शेसदेकोयजुर्यन्नतो।अधिकंतस्यवाक्यांतरंपजुषि रंतरंवत्युक्तेभवत्येवंस
र्वत्रपुरस्तात्पुरस्ताद्वैकार्थत्वसमर्थपदपरिग्रहेण।समर्थविमाकेनचमिन्नानियजूंषिकल्प्यंते।
तेनैकवाक्यलक्षणात्प्रैवार्थात्यजुर्भेदवाक्यभेदलक्षणापोःसिद्धिरित्येतस्माद्वेतकारणाद्
त्पाह।किमुदारणमिति।अनिषेपत्वाविनमार्थशब्दैरगृहीत्वालक्षणाद्गपसमावेस्याःसंभावन
पाष्ठछति।तथाहि।एकार्थत्वेपदस्यस्यात्साकांक्षावयवंननत।साकांक्षावयवःसंघस्तस्यै ५८

कोर्थो न विद्यते। यदस्य स्याकृतिर्नाम्नैकोर्थो भवेत्। ननु तदवयवानां वर्णानां प्रकृतिप्रत्ययपयोर्वा विभागे
साकांक्षत्वमर्थप्रत्यापरशक्त्यभावात्समुदायावयवास्तु पदानि विभागे परस्परमाकांक्षेति। नचैषामेकार्थ
त्वे प्रतिपदमर्थभेदात् समूहस्यैव यथार्थता प्रसिद्धेः। अतो लक्ष्याभावादलक्षणमेतदिति प्रश्ये ज्ञन्वा
वाभिप्रायेणैदेवस्यत्वेतुदाहृतं। न वितिमिरस्य स्वाभिप्रायं प्रकटयति। पदायदार्थव्यतिरिक्तः कश्चिदेको
निर्भागो वाक्यार्थो नास्ति। तदा तत्तत्पदार्थधर्मो वैवसामीप्यवशात्तेषां गम्यमानो भेदसंसर्गौ स्यातामत
आह। तथाप्येकार्थता न स्यात्। कथं। भेदानाम पदार्थानामवच्छेदत्यरस्परं। सच प्रतिपदार्थत्वान्नैक
त्वे प्रतिपद्यते। व्यक्तिपदार्थपक्षे संसर्गव्यावृत्तीनां गवादिपदेन बोधान्नत्वाद्धि शब्दशब्दैः शुक्लादिभिः कृष्णा
दिवावच्छेदमात्रं वक्तव्यं तत्संसर्गः पदार्थान्तर्गतत्वात् न वाक्यार्थो भवतीति तदुपसर्जनेन स्वेषां भेदोग्र
ह्यते। सत्र यथा शुक्लशब्देन गोशब्दस्य कृष्णादिभ्यो भिद्यमानत्वाद्व्यक्त्येवं शुक्लशब्दस्यापि गोशब्देन
श्वादिभ्यो निवर्तितस्य भवति व्यवच्छेद्यनानात्वाद्धि नास्त्येकत्वे प्रमाणं भेदसामान्यग्रहणे वा भवेद्वा

क्यार्थैकत्वप्रसंगः पदानुत्तेरवंतः पदार्था एव वाक्यार्थः तदा सिद्धमेव नानात्वं। तथा संसर्गोपि पदार्था
नामन्योन्येनानुरंजने। एकैकत्र तदप्यस्तीत्यैकत्वेन प्रतीयते। आकृतिपदार्थपक्षे शुक्लत्वगोत्वयोः स्वरू
पत्तानिहितयोः संनिधानादितरेतरानुरंजनमर्थसिद्धं नेदं वाक्यार्थः स च गोत्वशुक्लत्वसंसर्गः शुक्ल
त्वगोत्वसंसर्गः सामस्त्येनैकव्यक्त्युपसंहारात् उपलभ्यत इति नाना। यद्यपि वाक्यार्थविद्भिः पदस्यैवा न
पत्रापि संसर्ग इत्यैकत्वं गम्यते तथापि वक्तृरूपदेपेन पेन प्रदेशेन पदद्वयं संसृज्यते। तेन संसर्गरूपाप
५९ लब्धेरनेकत्वं। किंच। स्वप्राधान्यात्पदार्थानां धर्माविताबुनावपि। धर्मिभेदेन सिद्धे तेन ह्यैक्यमुप
श्रितं। यावद्धि प्रयोजनैकत्वं नाशीयते। तावत्स्वतंत्राः पदार्था नैकत्वमापादयितुं शक्यं तदुतिए
थक्पृथगेव भेदसंसर्गावनुभवंति। तस्मादपि नाना। यद्यपि वास्माकमाकृतिपदार्थैकत्वान्नैवन्ने
दो वाक्यार्थत्वेनाभिप्रेतः। तथापि पूर्वपक्षवादिना विकल्पमात्रेणोपन्यस्तः॥ सिद्धांताभिप्रायविवर
णं प्रयोजनवाविवादर्थशब्दस्योपयत्रो। एवं सत्येक एव कश्चित् सदार्थः प्रधानभूतः तद्विशेषणत्वे ५९

नेतरोपादानमितिसर्वेषांवतद्गदानंतत्संसर्गो।द्वैकोभेदः संसर्गोवित्यपिशकांबदितुं।तस्यात्कर्मसमस्वा
पिलिनद्दष्टार्थलत।अशेषसविकल्पादिपदार्थविशिष्टं निर्विकल्पप्रकाशनेसमस्तस्यपदसमस्तस्यके
प्रयोजनमितिसिद्धमुदाहरणं।परस्तुनिर्विकल्पप्राधान्यमज्ञात्वापृच्छति।ननुअज्ञदेवमप्यत्वेति।सिद्धांत
वायाहोयदितिर्वेयामीत्यनुषंगस्तत एवंसर्वानुषंगस्तद्गुणाभावेस्वेत।नवास्यगुणाभावःप्रयोजन
वत्वातासविकल्पादीनांवाकर्मसमवायादित्येकगर्यत्वं।अथकिमर्थमुत्तयंकृत्वित्तमितिपक्षीसंहताना
मेकप्रयोजनेत्वंतेषांतद्गतस्त्वेनामेकांतेनैवमाकांक्षत्वंभवतीत्यवाच्यंतत।अथवाविभक्तमान
साकांक्षत्वंसंहतैकप्रयोजनत्वेनविनातन्नवतिप्रत्येककार्यप्रतिनिरपेक्षप्रवृत्तिसिद्धेः।अतःसाकांक्ष
त्वाविनाभाविन्वैनैवतराकेयात्।तन्मात्रमेवाभिधातव्यमितिप्रत्युदाहरणंदर्शयतिउच्यते।पुराड
शविभागप्रकाशनमेकंप्रयोजनंनिरपेक्षाणांदृष्टं।निर्विकल्पेदत्तोत्तेरापिविभागनानात्वपरिवादत्वा
सेहमविशेषानुपादानात्।पुनःपुनःप्रयुक्तस्यवानुषंगदोषाभावाद्रुपपत्तस्यते।तत्रोच्यते।नतावन्नि

रूपेष्टसाधनभेदादपि क्रियानानात्वमिति विस्तरः ॥ साधनप्राधान्यं तु प्रत्यक्षमेव । एतत्कृतोऽपि विशे
षः कर्म्मानंगत्वादनादरणीय इति सामान्यप्रकाशनादेकार्थत्वं । तस्मिन्नौदेत्यस्य पूर्वापेक्षितत्वेस
त्यपि प्रयोजनभेदादाकांक्षा तरत्वं । तस्मात्संहततयोरेव लक्षणत्वं ॥ ॥ समेषु वाक्यभेदः स्यात् ॥ ॥ येषा
मदृश्यमानकर्म्मसमवेतार्थत्वेन लैंगिकविनियोगासंभवेन वचनाद्विनियोगः तेषां प्रागदृष्टार्थमंत्राव
६० घेकमंत्रत्वेऽपुक्ते । तथा हि कल्पयस्तेषां मदृष्टोऽर्थः स वाच्यः स्यात् । प्रमाणाभावात् । कल्पिते वा तदेकत्वे
साकांक्षाप्युवियोजिताः । यदा हि वक्ष्यदृष्टकल्पनानिः प्रमाणकैकत्वेकदृष्टो सर्वेभ्यः कल्पितं भव
ति । तदा प्रत्येकसाधनशक्त्यसावाद्भिन्नदृश्यमानमसाकांक्षत्वमस्तीत्येकवाक्यता । कथं पुनरस्मिन्न्य
न्दे प्रतीकभेदेन विनियोगाः इष्टत्वे तिशाश्वी छिनत्ति कुंडे छेत्यतमा भिरित्येवमादिः कथं वक्तुं ती
वीचयतिः इति बहुत्वनिर्देशात् तदुच्यते । एकोऽपि बहुभिर्मंत्रैः प्रतीके विनियुज्यते । पुनः पुनः प्रयोग
च कृत्स्नेरित्यभिधीयते । आदिमध्यावसानग्रहणैर्नैकोऽपि मंत्रः तत्र तत्र विनियुज्यमानानपीड्यते । ६०

यावद्विनियोगं स्विसकत्वमावर्त्तमिष्यतेश्चेवंदः स्यात्प्रयोजकत्वात् । कल्प्यतां कल्प्यतामिति वा पुनःपुनः
प्रयोगादेकवाक्यत्वेपि बहुवचनाविरोधः ॥ उच्यते । नैमदेवंरूपादुत्तरकाले हि विनियोगप्रयोज्यो
ज्ञने । तस्मात्प्रागेव तत्स्वरूपेर्ण्णेदानेदपरीक्षणं । तिष्ठतु तावत्प्रयोजनकल्पने विनियोगवाक्यं वा
नद्दितदुत्तरस्काले स्वरूपनिरूपणं पुष्कं । अज्ञातरूपस्य विनियोगाशङ्केव विनियुक्तस्य प्रयोजन
कल्पनानुपपत्तेस्तन्निरपेक्षं तु रूपं यावादेवावधार्यते तत्कालावस्थततेदानुवर्त्तित्वं वप्रयोज
नविनियोगयोः प्रमाणवद्बोनेकमपि कल्पनीयमित्यक्तं रूपोपलब्धिवेलायां वेपत्वादीनां नपर
स्परसाकांक्षत्वमेकप्रयोजनत्वं वोपलभ्यते तत्तश्चनिः प्रतिद्वन्द्वेवधारिते नेदपश्चान्न किंविदेका
त्वापादनेकारणं संभवति । न च प्रागनुपलब्धस्य कांक्षत्वे कल्पयितुं शक्यते । तेन च विनाप्यद्यथ्ये
कप्रयोजनत्वं नवेत्तथाप्येकाग्र्वे कल्याद् एकवाक्यत्वाभावः ॥ किमुत यदारूपभेदान्ममप्यद्विनियो
गभेदसन्देहे दावाद्दष्टार्थत्वेपि प्रयोजनानेदः त्वत्पक्षे वाचवश्यं स्यावद्विनियोगं तेनम्भवितव्यं ॥ इ

यांस्तु विशेषणत्वमसमस्तानां मंत्रांतं मन्यध्वे तेभ्यः। न वैषामदृष्टार्थत्वं ब्राह्मणोपदिष्टच्छिनद्मीत्या
दिसाधनत्वात् तत्वेन वैषांपावृत्ता विनावोदितकरणसामर्थ्येनास्त्रिता वदनाम्नातमपि कल्पनी
यं यद्वा यथैव रथघोषेण माहेन्द्रस्य स्तोत्रमुपाकरोतीति वचनाद्वाक्यस्यापि विनियोगमात्रानु
संधानेन स्तोत्राभिमुख्याविरुद्धत्वं भवति। एवमिषेत्वादीनां छेदनादिस्मरणहेतुत्वं। उभयमपि
६१ रितत्प्रमाणवादिति सूत्रकारैः केष्विदर्थं विद्याश्रितं। सर्वथा त्वेकमध्यवसितव्यं विकल्पवाक्यप्रयो
गासंभवात्। अवाक्यप्रयोगानुपपत्तेश्चाबाध्याहारः। अथवा यथाम्नातपद्या विनियोगानुसारा
न्तादृशेनैव स्यार्तु संस्कारार्थानेयपतितव्यं। तत्रानुष्ठानप्रतिप्राप्याधीनेनान्यतरपरिग्रह इति दृष्ट
प्रयोजनभेदादपि सिद्धो वाक्यभेदः॥ किंच॥ अन्योन्यस्वरूपेक्षाणां कार्यान्यत्वे निषेधात्। प्रत्य
कंपागहेतुत्वाय युक्तमवकल्पते॥ तथा पूर्वार्थज्ञे न कल्पता। मिषेत्वमादीनां निराकांक्षभिन्न
रूपोपलब्धेर्नैकवाक्यतेति ४ सत्यप्येकार्थत्वे न वक्तदस्ति। आपुःकल्पनादीनां भिन्नत्वात्। नि ६१

वेऽपवदभेदइतिचेत्।नाकृतीरितिमंत्रवदुक्त्वाचोदनायाःप्रत्यक्षत्वातइहतावद्दर्शनामकर्मां
गत्वावादविवक्षायांसत्यांमंत्रोच्चारणमात्रंप्रयोजनं।तत्रवद्धाःरूपप्रयःश्रूयंतेतद्वेदश्वनार्थ
भेदमंतरेणाभवतीत्यजरोपसर्जोनमूतोर्थोनानात्वेनाश्रीयते।कृप्तिविशेषकथनेवद्दृसार्थमिति
मंत्रवदुक्त्वापादनार्थत्वात्यथाविभागइति।सकृच्छुतनिर्वापेवैलक्षण्यात्कृप्तीनां।पुनःपुनरु
क्तानितशब्दोपिपथाविभागःसाधनभेदेसत्यपिनाश्रियते।तथाकृप्तिभेदेपिनभविष्यतीतिमन्य
ते·नैनदेवमित्युत्तरंसामान्यविवक्षानुपयोगात्अथवाश्लिष्टवाच्येवयथाविभागेनैतदेवति
त्रमन्त्रेदप्रतिभयमेवैकवाक्यभूतमेवोत्तरंददाति।ननुभगोवीविभज्यत्वित्यादीनांविभागवाक्या
नामपिभेदोस्त्येवेतिनोपन्यसनीयं।एवंतर्हिनिवेदभभेदप्रतिपत्त्यर्थं।किंतर्हिदृष्टांतेनसहैकला
पादनपरत्वात्तदीयविकल्पापादनायोपन्यस्यते।यथाविभागेतथात्रविकल्पः।कस्मान्न
भवतीतिनैतदेवमिति।समानविषयत्वेविकल्पोभवतिनचेहसामान्यविवक्षायेनावि

नागरेकार्थत्वं भवेत्‌ क्लृप्तिविशिष्टापुराद्याशासनपरत्वात्‌। दिनागेहि साधनानामप्रयोजनत्वे
त्सामन्यभूतक्रियाप्रकाशनपरत्वे इह पुनः पुरादीनामाशास्यत्वेन प्राधान्यात्तद्विशेषणत्वे
न हुत्यादुपादाने। नत्वापुरादिविशिष्टा साप्रकाश्यते। निःप्रयोजनत्वात्‌। अथापि क्रियाशाब्दं
तथापि तद्भेदपरत्वान्नानार्थत्वं। भेदपरत्वे च पूर्वोक्तमेव दृष्टार्थमुच्यते। अथ वा क्लृप्तीर्वाचय
६२ तीति नैवमंत्रपरः क्लृप्तिशब्दः। कथं तर्हि क्रियाबहुत्वाभिधानएव शब्दानामर्थवत्त्वात्‌। अतश्च
बहुत्वसंख्यया कर्मभेदाद्विशेषणकृतभेदासपणाश्च मंत्राणि। तत्सरत्वे वोदितार्थानिरूपत्वादृष्टा
र्थत्वात्सिद्धाभिन्नार्थता। कथं पुनरस्मिन्पक्षे वाचयतीत्युच्यते। शब्दपदार्थकोह्ययं प्रयुज्यते। नैष
दोषः। उभयत्र प्रयोगात्‌। यथैव ऋत्विजा देवं तं प्रयुंजानो वाचयतीत्युच्यते। शब्दपदार्थको तथैव पः
शब्देनार्थं ब्रवीति तस्यापि प्रयोजको वाचयतीति। तस्मात्क्लृप्तिक्रियाः शब्दैर्जनमाने वक्तुं प्रवृत्तम
द्ध्वर्युर्वाचयतीति अयमर्थो विज्ञायते तत्र काशनेन च भिन्ना एवमंत्राद्दष्टार्थात्‌ भवंतीति वाक्यभेदः॥ ६२

नुषंगोवाक्यपरिसमाप्तिःसर्वेषुतुल्ययोगित्वात्।। ज्योतिष्टोमेतिसृणामुपसदामादावाग्नेयीवि
हिता। अग्निमनीकमिति। तत्रप्रथमायाः। क्रमेपातेऽग्नेऽयाशयेतिनिराकांक्षोमंत्रआम्नायते
उत्तरयोस्तुसाकांक्षौयातेअग्नेरजाशयायातेअग्नेहराशयेतितत्रस्त्रीलिंगपदच्छन्ननिर्दिश्यमु
पदार्थंनकेनचिद्विनापरिपूर्णतानास्ति। ना। वापरिपूर्णेनव्यवहारोवकल्पतेतत्रतदन्यथानुपप
त्त्यावश्यंपरिपूरणासमर्थोवाक्यशेषःकल्पनीयः। कुतः। न्यूनवाक्यप्रयोगोहिवेदेनैवसमाश्रितः।
क्वचिल्लक्ष्यापिस्थितःशेषःसोन्वेष्टव्यःप्रयत्नतः। नहिवेदवाक्यानांप्रत्यक्षमेवैकंप्रमाणं। तद्व
देवह्यनुमानादीन्यपिप्रमाणानि। सर्वप्रमाणप्रत्यक्षमयेयवचपुनाभावःपरिच्छिद्यते। तदिह
प्रत्यक्षानुपलब्धेवाक्यशेषेनतावत्येवोपरंतव्यं। यद्यनुमानादीन्यपिनिवर्त्तिष्यंते। ततएता
वानेवापेमंत्रइतिकल्पयिष्यामः। अथतुतैःकश्चिदवगम्यतेततस्यसंहितोयंमंत्रःसकलः
प्राकृतस्माद्न्यूनइत्यध्यवस्यामः। नदिहार्थी। यस्मात्तावत्सामान्यतःकश्चिदस्तिशेषइत्यध्यवस्ये।

ततश्चाम्नावस्थानवस्थादोद्भूनमिदं वाक्यं न प्रयोगार्हमिति तत्र शेषाकाङ्क्षापौ लौकिकाः कल्पनीयाः उतवै
दिक एव पूर्व मंत्रस्थः तत्र्वीर्षिष्ठेत्यादिरनुषक्तव्य इति संशये लौकिक इत्याह । तथा हि नान्यत्रे
त्रपहृते गस्तुं वैदिके संनिवेशनं । यथेष्टविनियोगं नु सर्वार्थं वस्तु लौकिके । यथैवाहवनीयादयो
वैदिकाः स्वविर्हिष्टकार्यव्यतिरेकेण निवर्तन्ते । तथैव वैदिकाः शेषाः पत्नवाक्ये समाम्नायेन विविनि
६३ युक्ताः सतन्निवेशनत्वान्नान्यत्र प्रयोगे क्षमंते । लौकिकाः पुनरनिवद्धत्वात्सर्वार्थाः सर्वाकाङ्क्षापूरणा
त्मापि नियुज्यमाना न विरुध्यते । तस्माल्लौकिकाः । तत्र यदि वैदिकमाप्यरचितवाक्यं श्रुत्वा प्रयोगं
रचयितव्याद्वैदिकं मत्वा नः प्रयुंक्ते न केनचिद्वार्यते वैदिकत्वबुद्धिस्तत्र न कर्तव्या तथा हि । ता
न्वैदिका वर्णानुपूर्व्यादिनियमिता स्वाध्यायनियमो हि वालोकत्वबुद्ध्या प्रयुंजते । यदि वानंतर्यं
विशेषाद्दृक्तश्शङ्कयेत्पनमापि संबंधोऽभ्युपगम्येत । ततो यथानिवेशं प्रयोगात्पुरस्तादेवास्य प्रयो
गः प्राप्नोतीति तस्मादपि न वैदिकः शेषस्त्विति प्राप्तं उच्यते । विमुक्तव्यापृतौ वेदे लौकिकावसरः । स्वि ६३

तिः तद्व्यापारविमोकश्च सकलान्वेषणादूर्ध्वं वैदिकस्य वाक्यस्य वैदिकः शेषः पूरणक्रमेण न लौकिकश्चो
दनालक्षणधर्म्मे नियमात्। यदा तु वेदः सर्वात्मना विचार्यमाणोपि व्यर्थव्यापारो दृश्यते तदा लौकिकमप्य
नुज्ञानाति सा चान्वेषणा पृथा सन्निकर्षप्रवर्त्तते॥ तत्र ग्रहदृष्टः प्रकृतावर्थः प्रत्ययेन्विष्यते पुनः। पदैस्त्विमि
न्नः। लब्धाप्तलप्रार्थतीयः पदान्तरे। स्वस्मिन्वाक्ये विनस्य च्छिन्नमन्यो वा वाक्यान्तरे ततः। वाक्यान्तरे पि नस्याच्छिन्नम
न्यः प्रकरणे ततः प्रदिष्टकरणे नस्यान्नन्यः प्रकरणान्तरे एकस्मिन्नर्थे साकाङ्क्षमिति प्रकृत्या प्रत्ययेन
वार्त्तसंबंधमसमर्थमर्थान्तरं यदि तावद्दृश्यते तन्तोरमणीयमर्थं न दृश्यते। ततः प्रमादालस्यपरित्यज्य प्रवृ
त्तो प्रत्ययेवावेष्टव्यः तथा पारयिवेन्न दृश्यते। ततः पुरस्तादानन्तरेवावरितपदान्तरेन केदनन्तरे लभ्यते लौकात्त
रद्योतरादिव्यवस्थितेः। यदि तु स्ववाक्येन लभ्येत ततस्तेनैव क्रमेण प्रकृतवाक्यं। तरे वाक्यान्तरे ध्वलभ्यमाने
यथा पञ्चाप्यमानानुसारेण प्रकरणान्तरे। यदा तु तत्रापि न लभ्यते तदा लौकिके लोके पिवेन्नोपलभ्यते ना
स्तीत्पिवमधार्याकांक्षाबुद्धिं ज्ञातिलेन परिकल्प्य निराकांक्षीकर्त्तव्यं सर्वत्र वा हं किक्षष्टानलब्धेश्चे

द्विप्रकृष्टापि वैदिकः स एव वा वैदिकस्तुस्यात्सामान्नः सन्निहितोपदाता तादिहस्तलक्षाज्ञापाद्दशाश्रयावकथ्येः शेष
स्वपदवाक्ययोरलभ्यमानत्वात् व्याकीतरेतूनमितुपसंह्रियते। स एव पादगाकांक्षितस्तत्र गौवैकस्यानेतरं
पुरस्तादुपलभ्यते। अन्यस्य व्यवहितः यद्यपि वा सोपयमं मंत्रे कृतार्थत्वात् न तावाकांक्षति। तौन्तुतेन वि
नानुपपद्यमानावान्यसमापेन्यस्यानाम्नानादेवं पुरुषं प्रयुञ्जाते। सर्वसमीपे सन्ह्रूत्यपठितुमशक्यः
प्रमाणान्तरलभ्यत्वात् पुनः पुनरन्वावितोपमावयोरप्यर्थनाम्नातः शेषोनैकस्यैव संनिधिविशेषु निमि
६४ त्तत्वेनाकल्पितव्य इति। यद्यपि पुरस्तादालोच्यते। तथापि पत्प्रदेशावर्त्तित्वे नतावत्याकांक्षितः त
त्रैव विनियुज्यते। कुतः प्रतीतिमात्रत्वात् मार्थतत्स्वदेशे सम्पद्यते। योग्यत्वात्सन्निवेशात् पूर्वमंत्रवाहिष्य
ते। सन्निहितस्तदाम्नायमानः सर्वेषामीप्सितेप्रदेशेन शक्यत्वात्मानुमितोकस्यपयथात्ते समाम्नातइतरपेक्ष
पावता बुद्धिविषयमापद्यते। ततश्च गृहीतः स्वरूपमपि प्रदेशान्तरे स्थानुमानसमर्थो। ताभ्यामपि वा नन्वयर
त्तित्वेनानाकांक्षितः पूर्वत्वत्वपरस्ताद्भावितयादृष्टसासामर्थ्यः परस्मादेव निविरूपते नाप्यकालेणानुप्र ६४

यमद्वितीययोर्मध्येपाठादगृह्यमाणविशेषशेषउन्नायोरष्यानंतनिर्माणेवसंबंधीतुक्तान्तृतीयस्यव्यवधानो
दसंबंधमाशंक्यार्थिवाविशेषादुन्नयसमुदायापादनेनाव्यधानेसावितेसमुदायेशेषत्वमेवप्राप्नोतीत्या
शंक्यतर्हितस्याप्रयोगारूढत्वात्प्रयोगार्हसमुदायिसंबंधः। तत्रापितयोःप्राधान्यादन्यथावैतराकांक्षा
नुपपत्तेःप्रत्येकंसकलशेषसंबंधसिद्धिरित्यवधार्यपुनर्व्याख्यानेतरमारब्धे अपिचसकांक्षस्यसंनि
धाविति। तत्रकेचिद्व्याख्यानविकल्पाएवैतस्याश्रिते अपरेतुवदंति। पूर्वापरितोषादुत्तरकृतं किंकारणमि
ति। नतावत्समुदायत्वेनविनिर्मितंतयोः। पुनःप्रत्येकनिर्माणेनवैदेतुःप्रतीयते। समुदायत्वंप्रत्येकका
यित्वेनैकशास्त्रीयादानेनवाभवेत्। नवात्रैकमप्यस्ति। नचेदमेककार्यत्वमेकवाक्यशेषग्रहणानाम।
श्रेरणुखलुमंत्राणांकार्यविज्ञाने। अन्नावत्समुदायत्वंकेनविनिर्मितंतयोः। पुनःप्रत्येकनिर्माणेनवैदे
तुःप्रतीतोन्नयोःस्यात्। कथंतत्कार्यमित्युच्यते शेषश्चासौतयोर्नो। तद्दर्शनेसमुदायत्वोपपत्तिर्युक्तापश्चादपिवा
समुदायिन्यामेवतस्यसंगतिरिष्टेति आदितएवसमुदायत्वेनलभ्यते। यदिवसमुदायत्वमाप्नोतितत:पुनः

प्रत्येकंसंबध्येद्इतिराजैकपुत्रक्रीडापद्येततस्मादेवप्रयोगाः प्राप्नोति। तथाभूतेनसमुदायानंतर्यो
त्। नवाग्रहमाणविशेषत्वंदेशभेदनिमित्तंनभेदात्। प्रथमस्यह्यसौयथाकौक्षेतद्देशोस्थितो। नो
त्तरयोः तस्मादिदमेवव्याख्यानं॥ आकांक्षासंनिधानंवयोग्यताचेति वचनंयंसंबंधकारणत्वेनक्लृ
प्तेनानंतर्यश्रुतिः यो ह्यविकृतः संबंधित्वेनस्वरूपादाम्नायते। तस्यात्ररूपभावेकेनानंतर्यमितिनतदेवत
दीसंबंधकारणत्वेनाश्रीयते तत्राप्येतस्मादेवकारणान्नयत्रसंबंधसिद्धिः संनिधिविशेषात्तुतदाश्रय
६५ स्यप्रतिपत्त्याभवतिमंत्रांतिः साक्षात्प्येतुसाकांक्षयोग्ययोः संनिहितसंबंध्यंतरदर्शनान्निवर्त्तते। यथाधाव
त्यादिविशिष्टबुद्धिगुणः उपदानसामर्थ्यात्। एवंहित्तत्रज्ञायते। सर्वोर्थोपिमाम्नायमानः सर्वसाधार
णानंतर्यासंभवाद्धत्वैकत्वाच्चकस्यचिदेकस्यैवसमनंतरंपठ्यते। तस्मादकारणमानंतर्यमितिहेनि(
धिरितिबुद्धेविपरिवृत्तिः साक्षानंतर्यसंबद्धंवाक्यव्यापेनभवतिसंबद्धपदव्यवधिरण्यानंतर्येप्रका
रएव। कथं। अनंतरेणसंबद्धः स्यात्तरस्याप्यनंतरः। ततश्चपुनस्तदारूढः परानंतर्यमश्नुते। यत्तुअनेर ६५

ङ्गाङ्गापेत्यनेनापेक्षितः शेषः परस्मादवलम्ब्यमानः पुरस्तरन्यरात्स्पालोच्यमानोऽलभ्यते तत्सर्वेष्वविघ्नेति । यदा वत्तत्रा
दूरस्तदा दूराशयेत्यस्यानंतरीभूतः पुनरेवमेवं तृतीयेनापि महद्व्यवधाते । ततः परेत्वन्यस्यानान्ना नान्तवक्ष्ये
वोपत्रीयते । सर्वत्रैवमपरद्वा पुनस्तात्परस्ताद्यवस्तैकैकत्राद्युच्येतत्तेषामनंतरां भवेत् । तावद्वयेद्धमाणानि
गृह्णाति । यावत्किंचिन्न्यायेष्यमाप्यते । गंदौपलब्धांततः सर्वमात्नेवितमुपसंहृत्य निवर्त्तते । पद्यापिवक्र
मेणोच्चारणात्संनिकर्षविप्रकर्षौ प्रतीयेते । तथापि निःस्पृत्वादेदस्यानंतरे दूरस्थेव युगपदपेक्षा संबंधश्चे
ति । पश्चादवगमान्न प्रामाण्ये कश्चिद्विशेषः एवं वाक्ये पदानां प्रकरणेव वाक्यानां संबंधोपावत्साकांक्षे
ण तत्संबंधार्हणा परस्यानंतरीकर्त्तुं समर्थेनाव्यवधाने । अव्यवधानेपि छेदपीति । विरोधिना पदेनाव्य
वधाने विप्रकृष्टत्वेपि भवति संबंध इत्यर्थः ॥ तस्मादनुषंगः समाप्तिः ॥ अनुषज्यत इत्यनुषंगः । सएवसम
माप्यते अनेनेति समाप्तिः ॥१७॥ ॥ यत्र तावदविभिन्नः साकांक्षास्तत्रैवमथ यत्र नैराकांक्ष्यं सर्वेषु शेषिषु
एकः शेषः साकांक्षः पद्यते । यथा चित्पतिस्त्वा पुना । वित्यतेषां मंत्रे अच्छिद्रेणेत्यादिस्तत्कथमिति । किं प्रा

प्ते अनंतरेण संबध्यशेषस्येष्ट कृतार्थता शेषिणः अनिराकांक्षाः किंनिमित्तानुषंगग्रहणं ॥ उच्यते ॥ अनंत
रस्य वाक्यस्य यदि शेषो न वेदयी ॥ तत एवं न वेदयत्वा रव्या तार्थेन सर्वनाकृ ॥ आनंतर्ये विशेषणाद्यपुन
त्वित्य न संबध्यते ॥ सर्वे कएव त्रिष्वपि वाक्येषु तदेकत्वाद्योर्थस्यार्थैकत्वं ॥ न वकारएकान्तदात्तस्य भेदो
भवति ॥ येन वित्यत्वादिसंबंधादन्यत्वं विज्ञायते ॥ न वा छिद्रेणत्वेदमर्थाक्रियायेन सकृत्संबंधेनानुष्ठी
त ॥ तस्मादस्य क्रियार्थत्वाद्यावदेषायुज्यते । तावदवप्रयोगित्वं कार्यानां प्रवनेयथा ॥ अथोच्येत
६६ एकत्वेयस्यापात्कर्तृविशिष्टान्यामायाः करणसंबंधमश्नुयते । तद्वि शिष्टेवतेनयोजयितव्या ॥ यथैक
स्यापिद्यातिष्ठो मध्यमेनावरुणान्यासविशिष्टस्यपयसा स्याश्रयणांवोदित नां तिप्रसज्यते ॥ पथाव
त्रैव वित्यन्यादयो न सर्वे सर्वत्र भवंति ॥ उच्यते ॥ अयम्यानां व्यवस्था हि भिन्ना पूर्वे प्रयुक्तिता ॥ कर्तृत
रावरोधाद्ववित्वान्यादेरसंकरः ॥ ऐंद्रवायवग्राह्णान्यासानामदृष्टार्थत्वात्तद्भेदकृता अयणाच्यवस्थायु
क्ता ॥ न विहतथा किंचित्कारणं अस्ति करणस्य क्रियाप्रयुक्तत्वात् ॥ करणप्रकाशनद्वारेणासैव वि ६६

याप्रकाश्यते।सा च सर्वत्रादिविशिष्टा चानन्यकांक्षानमपेक्षते॥ यथा च वाक्यत्वपादानात्रस्य प्रानन्यापाठ्यस्थित्य
तिर्निवर्त्तते॥ नैव मच्छिद्रपवित्रप्रतियोगिकान्तरांतरश्रवणमस्तियेनैतन्निवर्त्तेत॥ न च कर्तृप्रयुक्ते कर
णे॥ यतस्तन्द्रेदाध्यवतिष्ठेत॥ कारकाणां क्रियाद्वारेण तेन परस्परसंबंधाभावात॥ न च्चैव मपि मंत्रांतर
गतेनापि पुनातु शब्देनास्य संबंधः स्यात। नैष दोषः॥ दर्शपूर्णमासमद्दृष्टिधर्मवत्तत्वाद्वक्ष्यामि सिद्धेः॥ इह
प्रयुक्तं पुनातु शब्दस्य यत्कार्यं तत्प्रयुक्त मच्छिद्रादिविशेषणमत्र त्रयेपि च तदेकमिति प्रत्यक्षमवग
च्छामो नतु मंत्रांतरेपि कर्मांतरगातद्ध्यांतरगतसंस्कारार्थत्वात॥ न चैवं सत्येककार्यत्वान्मंत्रविक
ल्पः प्रसक्तः स्यात् कुतश्चैवमादीनां संख्यायुक्तविधानाद्धि समुच्चयः॥ सर्वेषु चैतेषु विपरिवृत्य भेगा स
न्निधिः संज्ञा यत्तेन मंत्रांतरेष्विति विशेषः॥ तस्मात्पुनातु शब्दोयं सर्वमन्त्रगतोपि सन्॥ अच्छिद्रपद
तः सर्वैः पुनः स्वद्यानपेक्षते॥ सर्वाभ्यासां ताभिहितेनाच्छिद्रेणान्यादिनाप्यनन्यगतिकत्वात्ययदा पुना
तुशब्दस्वीकृतः स्वदा पुनातु वच्छिद्रेणपवित्रेणान्यो वंकल्प्यते संबंधेयएवानंतरः पुनातु शब्दः स एव

पूर्वयोरपीतिकरणसंबंधप्रदर्शनवेलायां सर्वे निष्क्रियाः पदार्थाः संतस्तामपेक्षमाणाः सकरणीकामे
वसादयंतीति इति सर्वत्रानुषंगः एववाक्यत्याप्रयोक्तव्ये येतंत्रेणाप्रयुंजते तेषां तदालस्यमात्रं॥ पुरस्तात्प
रस्ताद्वाक्यशेषयोश्चानुषंगित्वाविशेषेसतियत्पुरस्तादनुषंगाद्वय इति केचिद्वदंति ते तद्विशेषप्रसिद्धि
मात्रमितिश्रुत्यंता॥१९॥ ॥व्यवायान्नानुषज्येत॥ ॥प्रत्युदाहरणत्वेन संनिधेरिदमुच्यते॥ असंब
६७ द्धतिरोधाने वैषम्यान्नानुषज्यते॥ संतेवायुर्वातेन गच्छतामित्यस्य साकांक्षस्यानंतरत्वादवध्यते॥ अ
तश्चवैदिकशेषासंनवादस्तिलौकिकस्यावकाशइत्यु घारित्तविशेषावद्धववनांतेनायोग्येनासंबं
धःस्तुल्यर्थीगित्वाभावाद्योग्येनापि संयज्ञपतिनानसंबध्यते॥ अतश्चवैदिकशेषासंनवादस्तिलौकि
कस्यावकाशइत्युन्नयस्वाप्यध्याहारः कर्तव्यः॥ अत्रयद्यपिनीत्वायंत्तगच्छतांगच्छतानितिवा॥ तथा
र्थेनुसंघातव्यः॥ अन्यथार्थापरिसमाप्तेः॥ तस्मान्नानुषंगइति॥ ॥प्रयोजनमनुषंगोमंत्रत्वोपायश्चि
लौलौकिकेत्वमंत्रत्वमिति॥ ॥आहवा॥ ॥आम्नायमानेह्यनुषज्यमानं त्वंतर्गतेमंत्रनिरू ६७

पर्णायां॥वज्रहृादिसाम्येनतुल्यौ किंकानांनमंत्ररूपप्रतितंत्रसिद्धिः॥क्व्य॥ ॥छ॥ ॥इतिश्रीमद्भ

ट्टकुमारिलस्वामिविरचितेमीमांसाभाष्यवार्त्तिकेद्वितीयस्याध्यायस्यप्रथमपादःसमाप्तिमार॥ ॥

९८ शुभमस्तु॥ ॥श्रीरामरामराम॥ ॥शुभमस्तु॥ ॥छ॥छ॥छ॥छ॥छ॥छ॥छ॥छ॥छ॥ ॥छ॥छ॥ ९८


१६५०

६८

१०२/२

102/2

इति पूर्वमीमांसा
याध्याये प्रथमना



वार्तिके द्विती
यः समाप्तः

१०२/२

६८